1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

TALES FROM SHAKESPEARE.

ADAPTED INTO SANSKRIT PROSE

BY

M. C. SADAGOPACHARIAR,

Assistant Sanskrit Pandit,

St. Joseph's College, Trichinopoly

PUBLISHED AT THE INSTANCE OF

V. VENUGOPAL CHETTY, I.C.S.

PRINTED BY

L. V. RAMACHANDRA IYER,

AT THE ORIENTAL PRESS,

MADRAS.

1904.

PERSONS OCCURRING IN THIS TALE.

एतन्नाटकस्थपात्राणि ।

MALES. पुरुषाः

1. Bertram. =भद्रश्रामः
2. Lafeu. =लाभकः
3. Girard de Narbon. =ज्वरार्दितनरबन्धुः

FEMALES. स्त्रियः

1. Helena. =हेलिनी
2. Diana. =देवयाना

PLACES. स्थानानि

1. Rossilion. =रोचिश्शिलं
2. France. =प्रांशुदेशः
3. Paris. =पारिषं
4. St. Jaques le Grand. =श्रीमहाजगदंबिकाक्षेत्रं
5. Florence. =फुल्लारामं

॥ श्रीः ॥

ALL'S WELL THAT ENDS WELL

॥ तत् सर्वं रुचिरं यद्यत् परिणामे सुखावहम् ॥

पुरा किल परिभूतपुरुहूतपुरविभवे, प्रांशुतमानेकानोकहनिवहपरिमण्डिते, प्रांशुदेशालंकारभूते पारिषनाम्नि प्रधाननगरे, अनेकसामन्तनृपतिमुकुटतटघटितविविधमणिगणकिरणमंजरीपुंजपिंजरितनिजचरणनखमयूखः, पाकशासन इवापरः शशास कश्चन सार्वभौमः, अनन्यशासनमखिलमपि प्रांशुदेशम् ।

सत्स्वपि विनम्रमौलिविधृतनिजशासनेषु सामन्तप्रभुवरसहस्रेषु, विविधाहवसहयुध्वा अमितबलपराक्रमः रोचिःशिलपुराधीशः एक एव अस्य प्रांशुमहाराजस्य विशेषस्नेहभाजनं बभूव । तेनैवं सविशेषबहुमानमादृतः स च रोचिःशिलप्रभुधुरीणः अनतिपरिणतवया अपि निजदैवदुर्विपाकादत्यासन्नमरणकालः बालं सकलसद्गुणरत्नाकरं भद्राकृतिं भद्ररामं नाम निजतनयतल्लजं भद्रासने समारोप्य जगाम भद्रंकरममरभूयम् । अस्मिन्नेवावसरे निरवधिकनिसर्गसौजन्यसार्द्रहृदयः सोऽपि प्रांशुनृपपरिबृढः अखिलभिषग्वरैरप्यपरिहार्येण अनुदिवसमुपचीयमानेन अतिक्रूरेण केनाप्यामयविशेषेण अकस्मादधिकमभिभूयते स्म । तदवस्थोऽपि स

सार्वभौमः रोचिःशिलप्रभोर्निधनमुपश्रुत्य समुपजातशोकविषादः तस्मिन् चिरनिरूढं स्वस्नेहसारं तत्तनये विनिवेश्य स्वनिकट एव तं स्थापयितुं कृताध्यवसायः "भद्रमुखं भद्ररामं सस्नेहबहुमानमत्र सत्वरमानय" इति लाभकनामानं निजमुख्यामात्यमादिदेश।

विदितनिखिलराजनीतिः कृत्यविदामग्रणीः स च नृपतिसचिवः शिरसि विधार्य तच्छासनं क्षिप्रं रोचिःशिलं प्राप्य पितृमरणदुःखितं भद्ररामं, नववैधव्यव्यसनपरिभूतां तन्मातरं च सम्यगाश्वास्य ताभ्यां यथाविधि विहितातिथ्यः उपांशु प्रांशुमहीपतिनिर्देशमेवं निवेदयामास।

"भद्र भद्रराम, भवत्तातैकपक्षपाती अस्मत्स्वामी श्रीमान् प्रांशुमहीपरिबृढः भवत्पितृनिधनमुपश्रुत्य नितरां विषण्णहृदयः त्वयि नितान्तबद्धस्नेहः सदैव त्वां स्वनिकटे स्थापयितुकामः सांप्रतं त्वदानयनाय मामत्र प्राहिणोत्। स चेदानीं सर्वैरप्यगदंकारैरचिकित्सनीयेन केनाप्यामयेनातितरां पीड्यते। तद्भवता अधुनैव शीघ्रमागम्यतां क्रियतां चात्मा अनितरसुलभस्यास्मत्स्वाम्यनुग्रहसर्वस्वस्य मुख्यं भाजनम्।

इत्यमात्यमुखादाकर्ण्यानन्यदुरवापामखिलजनप्रार्थनीयामतिगौरवापादिकामवनिपतिधुरीणाज्ञां ज्ञानवतामग्रणीर्भद्ररामः तेन सह गन्तुं तत्क्षणं कृतक्षणो बभूव। क्षणमपि तनयवियोगं सोढुमक्षमा सामन्तक्षमापतिकुटुंबिनी तु अचिन्तितपूर्वेण तेन निजतनयगमनेन

नितरां दूयमानमानसा पुनर्नवीभूतनिजरमणमरणदुःखा सुदूरं मभज्जागाधे अविषह्यविषादसागरे ।

इत्थमतिदुर्मनायमानामेनां नानाविधैर्हितवचोभिरेवमाश्वासयदमात्यशेखरः । "युज्यत एव, देवि, नववैधव्यविधुरायाः एकपुत्रायास्तव ईदृशं पुत्रवात्सल्यम् । तथाप्यनुल्लंघनीयं खलु निखिलैरपि सामन्तमहीपालैः श्रीमतो देवदेवस्यास्मत्स्वामिनः प्रांशुचक्रवर्तिनः अहितकरमप्यप्रतिहतं शासनं किमुताशेषहितनिदानमीदृशं शासनं? तस्मात् पुत्रश्रेयोऽभिकाङ्क्षिण्या भवत्या निश्शंकमधुनैव प्रेष्यतां मया सहायं प्रभुकुमारः । स्वप्रियसुहृत्पुत्रस्यास्य सन्ततसन्दर्शनेनातिप्रबलरोगपीडितस्यास्मच्चक्रवर्तिनः किंचिदिव शान्तिर्भविष्यति ।"

एवं तेन बहुविधमाश्वासिता निखिलधर्ममर्मज्ञा सापि प्रभुसहधर्मिणी प्रांशुमण्डलाधिपतेः शासनस्यानुल्लंघनीयतया कृच्छ्रेण पुत्रगमनमनुमेने । अपि च सा निजभर्तृविषये सन्ततदर्शिताधिकस्नेहभरस्य परमोपकारिणः प्रांशुमहीनाथस्यानुल्लाघतामाकर्ण्यात्यन्तदूयमानमानसा, उपशृण्वत्या एवासन्नवर्तिन्याः हेलिनी नाम्न्याः स्वानुचर्याः, लाभकमेवमभिधत्ते स्म ।

"आर्य, सचिववर, अद्याकर्ण्य रोगग्रस्तमस्मच्चक्रवर्तिनं ताम्यति नितरां मानसं मामकीनं । यद्यजीविष्यदियन्तं कालमस्या हेलिन्या जनयिता, तन्नियतमेतावता कालेनाभविष्यदेवोल्लाघता-

स्यास्मत्स्वामिनः सार्वभौमस्य।" इति हेलिनीमंगुल्या सचिवाय निर्दिशन्ती पुनस्तदधिकृतां कथामेवं कथयितुमारेभे।

"आसीदत्र नगर्यामखिलदिगन्तविश्रान्तनिजयशाः आयुर्वेदपारगः अपर इव भगवान् धन्वन्तरिर्ज्वरार्दितनरबन्धुरिति यथार्थनामा कश्चनागदंकारधौरेयः। स च प्रत्यासन्ने मरणसमये, स्वस्य एकपुत्रीमधिगतनिखिलवैद्यकलाकलापामनन्यगतिकामेनां कन्यामतल्लिकां चिररक्षणीयं निक्षेपमिव मद्धस्ते निक्षिप्य क्षीणायुरक्षयं पदं भेजे। तदा प्रभृति मयाप्येषाऽदोषा दोषाकरमुखी योषामणिः स्वपुत्रीनिर्विशेषं परिपोष्यते।"

इत्युक्त्वा यावत् विरराम तावत् आसन्नवर्तिनी सा च हेलिनी निरर्गलगलद्बाष्पपरीतनयना लज्जया किंचिदवनतमुखी तस्थौ। तदवस्थां तामालोक्य प्रभुमहिषी, "अयि मुग्धे हेलिनि, पुत्रीनिर्विशेषं मया संवर्ध्य लालितापि कृच्छ्रजीविनीव चिरवृत्तस्यापि ते तातस्य निधनकथाश्रवणमात्रेणापि किमित्येवं निरन्तरनिस्सरद्बाष्पप्रकरकलुषितनयनयुगला रोदिषि? अपि कदाप्यस्मन्मन्दिरेऽनुभूतं किंचिदपि दुःखं भवत्या?" इति सासूयमिव तया किंचिदुपलब्धा बाष्पाम्बुपरिप्लुते नयने प्रमृज्य सलज्जा किंचिद्दूरे तस्थौ।

हेलिन्याः तादृशविषादस्य परमार्थतो निदानं न निजजनकनिधनोदन्तश्रवणं; अपि तु अतर्कितोपनतस्तादृशः प्रभुकुमारस्य भद्ररामस्याचिरभावी दुस्सहश्चिरवियोगः। सा हि बाला आबाल्यात्तन्मन्दिरे परिपोषिता तस्मिन् मानातीतप्रेमभूमा ततान

सन्ततं निजमनसि चिन्तामेनां "निजरूपनिर्जितमारः कुमारसम-विक्रमः प्रभुकुमारोऽयमेक एव भवति मदनुरागभाजनं ; एनं विना स्वप्नेऽपि नान्यं जनं कामयते मामकीनं मानसम् । यद्यप्यभि-जनवतो रोचिःशिलपुराधीशितुस्तनयस्यास्य भद्ररामस्य, नाति-प्रसिद्धकुलसमुद्भूतायास्तदायत्तजीवनायाः मातापितृविहीनायाः मम च, पर्वतपरमाण्वोरिव भूयान् तरतमभावः, तथापि तमेव कामयते निर्लज्जमिदं मे मानसम् । तद्यद्येष प्रभुकुमारः स्वाननु-रूपां मां परिणेतुं नानुमन्येत, तर्हि तद्धाटीचेटीभावं वाप्युररीकृत्य सदैव तत्समीपवर्तनसुखभागिनी भविष्यामि" इति ।

सांप्रतं सार्वभौमशासनादकस्मात् रोचिःशिलपुरात् पारिष-नगरं प्रतिष्ठासुं तमालोक्य विफलीभूतनिजमनोरथायाः, अति-मात्रपितृवात्सल्याया अपि तदेकायत्तचित्तायास्तस्या हेलिन्याः मनसि नासीन्निजपितृनिधनवार्ताश्रवणजन्यस्य विषादस्याणीयान-प्यवकाशः । तत्तत्वमविजानन्त्यातिसरलबुध्या प्रभुमहिष्या पुनः, पितृनिधनप्रवृत्तिश्रवणमेव हेलिन्याः शोकहेतुरिति समर्थितम् ।

अत्रान्तरे प्रांशुचक्रवर्तिसकाशं यियासुर्भद्ररामोऽपि सादरं प्रणम्य निजाविश्लेषासहिष्णुं मातरं तैस्तैर्वचनोपन्यासैस्तां भृ-शमाश्वासयामास । कृच्छ्रादेवं तेनाश्वासिता प्रभुवरमहिषी प्रणम्र-शिरसमेनं निजतनयं सादरमारोप्य निजोत्सङ्गं मूर्धन्युपाघ्राय च स्वनयनसलिलप्रवाहैः स्नपयन्ती सगद्गदं तमेवमवादीत् ।

"वत्स भद्रराम, अस्मत्स्वामिसविधं गच्छतस्तव निरीतिकाः सन्तु पन्थानः। राजकार्येषु सदैवाप्रमत्तो भव। सततं स्वामिमनोरञ्जनपरः सन् भूयोभूयस्तत्प्रसादातिरेकभाजनं भूयाः। कदापि तन्मनोविप्रियकारकं कर्म मा कार्षीः" इत्यादिभिः नैकैर्नीतिवचनजालैस्तं सम्यक् संबोध्यानन्तरं समीपवर्तिनं लाभकमालोक्य, "आर्य मन्त्रिशिखामणे, अद्याप्यप्राप्तवयस्कः अनतिपरिशीलितराजनीतिरयं मे वत्सः तत्तदवसरेषु भवता स्वपुत्रनिर्विशेषं सम्यक् संबोध्य शिक्षणीयः" इति सविनयं प्रार्थितवती।

एवं मात्रा दत्तानुमतिः सोऽपि भद्ररामः पांसुक्रीडासहचरीं शैशवादारभ्य स्वस्मिन्निबद्धामन्दस्नेहभरां हेलिनीमुपांशूपसृत्य "भद्रे हेलिनि, दूराध्वानं प्रस्थितस्य मम विश्लेषेण यथा मे जननी नितरां दूयमानहृदया न जायेत, तथा त्वया कर्तव्यं ; मा विस्मार्षीश्च मयि तव चिरसंवर्द्धितं भ्रातृस्नेहम् "। इत्युक्त्वा, तस्याः प्रतिवचनस्याप्यवकाशमददान एव लाभकेन साकं परिमितपरिजनसंवृतः स्वपुरान्निरगात्।

यतः स प्रभुकुमारः सम्यक् जानन्नपि सर्वात्मना स्वस्मिन्नेवासक्तचित्तां चिरप्रार्थितनिजकरकमलग्रहानुग्रहां हेलिनीं, आभिजनतो विभवतश्च निहीनां तां नितरामननुरूपां मन्यमानः तस्यां बबन्ध चिरपरिचयसंभूतं साधारणमेव स्नेहं न तु हेलिनीमनोरथसंवादिनं शृंगारचेष्टाभिव्यंजकं वधूवल्लभैकसुलभमनुरागम्।

अथाल्पैरेवाहोभिः प्रांशुराजधानीं पारिषनगरीमुपेत्य स भद्ररामः सह लाभकेन धरणीरमणधुरीणनिकटमासाद्य सविनयभयभक्तिकं तं प्रणनाम। कृतप्रणतिं च तं स महीनाथनाथः सादरं सबहुमानं चांगीकृत्यातिगौरवापादकं अत्युन्नतमधिकारं च तस्मै दत्वा स्वनिकट एव तं स्थापयामास।

यदा किल भद्ररामो रोचिश्शिलपुरान्निरगात् तदा प्रभृति तस्यातिदुस्सहविरहानलदन्दह्यमानमानसा हेलिनी स्वाहारविहारादिषु दैनन्दिनव्यापारेषु नितरामपेतस्पृहा निनाय निमेषमपि कालं कल्पकोटिसमानम्। यद्यप्यनतिप्रशस्तकुलसमुद्भूतायाः हेलिन्याः अतिदुर्लभोऽसंभाव्यश्च श्लाघ्यकुलप्रसूतस्य तादृशस्य प्रभुवरकुमारस्य भद्ररामस्य करकमलग्रहणसुखलाभस्तथापि चिरन्तनसहवसतिसंवर्द्धितामन्दप्रणयपरिप्लुतस्वान्तायाः अनुदिवसानुभूयमानतद्वदननलिननिरीक्षणसुखपरिक्षीणनिजपितृमरणशोकायाः तस्याः अचिन्तितोपनतं तादृशं तस्यादर्शनं नियतं जीवन्मरणादप्यधिकं विषादस्थानमासीत्।

अथ सा निजमनस्येवं चिन्तयितुमारभते स्म। "सर्वथा नोत्सहे मद्वल्लभस्य श्रीमतो भद्ररामस्य वदनारविन्दसन्दर्शनाभावजनितं दुःखं क्षणमपि अद्य सोढुम्। विहताशायाः हताशाया मम सर्वा अप्याशाः सांप्रतं शून्या इव दृश्यन्ते। तत् कथमेतादृशस्य मे विषादस्य शान्तिर्भविष्यति? किमुत्सृजामि तादृशजनालाभनिष्फलं केवलं दुस्सहायासवासगृहं ममेदं हत-

जीवितं ? आहोस्विदद्य पारिषपुरवर्तिनस्तस्य महानुभावस्य समीपं गत्वा 'त्वदायत्तजीवितां अनन्यगतिकां मां कृपयांगीकुरु' इति सपादपतनं किं एनं निस्त्रपमभ्यर्थये ? अथवा कुतोऽकृतानुरागस्य कुलकुमारस्य तस्यास्मिन्नकुलीने जने भवेदनुकंपा ? तदद्य मे मरणान्नान्यत् शरणम्" इति चिन्तयन्त्यास्तस्या हृदि झडिति निजवल्लभसमागमप्रत्याशाशंसिनी काचिदुदभूद्बुद्धिः । अनुपदं सहर्षमात्मगतमिदमूचे ।

"अहो विस्मृतमेतदद्यावधि मया। अस्ति किल मम सकाशे सकलामयविध्वंसननिपुणमपरावतारेणेव धन्वन्तरेरस्मत्तातपादेन कृच्छ्रेण संपादितं स्वमरणसमये सादरं मह्यं समर्पितं अमोघवीर्यं महामूल्यं विविधमूलिकारत्नसारभूतं महौषधम् । एतत्प्रयोगेणाप्रतीकार्यरोगाभिभूतं प्रांशुभूपालं विगतामयं विधाय सन्तुष्टात् तस्मात् तद्वशवर्तिनमेनं प्रभुकुमारं पारितोषिकतया लब्ध्वा संपूर्णमनोरथा भविष्यामि । अपि तु अशेषभिषग्वरैरसाध्यत्वेन निर्धारितस्यावनीपतेरामयस्यामोघेनास्मत्तातपादस्यौषधविशेषेण सपदि समुन्मूलने संजातदृढप्रत्ययाप्यधिकमुग्धस्वभावातिबालाहं कथं राजनिकटे प्रवेशं लभेय ? कथं वा अज्ञातलोकतन्त्राया अकिञ्चनायाः कन्याया मम वचसि श्रद्धाय मां चिकित्साकरणे अनुमन्येरन्नाधिकारिणः ? इति मन्मनः सांप्रतं सन्देहदोलामधिरोहति । तथाप्यत्र विषये यावच्छक्ति यतिष्ये ।" इत्येवं स्वगतं मन्त्रयमाणा सा आगामिन्येव दिवसे पारिषपुरीं प्रति प्रस्थातुं निश्चिनोति स्म ।

अत्रान्तरे हेलिन्यास्तादृशं सर्वं स्वगतभाषितमनुपलक्षितः शृण्वन् स्थितस्तद्गृहकर्मकराध्यक्षः तत्क्षणं प्रभुमाहिषीनिकटमागत्य यथावत् सर्वं हेलिनीमन्वितं निवेदयामास । तदाकर्ण्यामन्दविस्मयाक्रान्तस्वान्ता साऽपि प्रभुकुटुंबिनी, " मद्वचनात् शीघ्रमत्रानीयतां हेलिनी " इति तं संप्रेष्य स्वगतमेवं चिन्तयामास।

" कथमियमस्मत्पोष्यवर्गान्तर्भूता अकिंचना अनाथा अप्रशस्तकुलजाता बाला निजस्वामिनीतनयं प्रभुकुमारमस्मत्कुमारं मारशरविद्धमानसा कामयते? अथवा नायमस्या दोषः । परमपराद्धमस्या यौवनेन। अतिविषमविषमशरशरदूरप्रहतचेतसां सचेतसां प्रवयसामप्यंगनाजनानां नियतं भवति खलु कार्याकार्यविचारमूढं चेतः ; किमुत समुज्जृंभमाणनवयौवनविवशीकृतचित्तवृत्तीनां युवतीनां ? अनुभूतचरमेव मयापि यौवनदशारंभे निष्करुणकुसुमेषुनिष्पादितमीदृशमतिदुस्सहं दुःखम् । अहो अतीव वामः खलु कामः कामिनीनाम् । "

इत्येवं चिन्तयन्त्यास्तस्याः, सत्वरं तत्राजगामाखिलसद्गुणशालिनी हेलिनी । आगत्य सविनयं प्रणम्य स्थितां तामेवमाह स्म प्रभुवरधर्मगेहिनी । "वत्से हेलिनि, मन्ये सम्यक् सांप्रतमवगच्छसि मां ते प्रियजननीम्" इति ।

"न हि न हि; देवि मम माननीया स्वामिनी खलु भवती।" इति तया प्रत्युक्ते, प्रभ्वी पुनरपि तामेवमवादीत् । "ननु भणा-

मि त्वं मे प्रियसुता; अहं च ते मान्या माता इति।" तां निपुणं निरूप्य, "किमिति ममैतद्वचनमाकर्ण्य विवर्णवदना प्रवातकदलीसदृशं सचकितं वेपसे ?" इति भूयः सनिर्बन्धं तयानुयुक्ता सा हेलिनी, स्वगतं "अहो ! सम्यक् परिज्ञातमिदानीमनया मम स्वामिन्या निजतनयानुरक्तहृदयाहमिति। तेनेयमेवं मामुपहसति।"

इति शंकाविष्टान्तरंगापि भूयोऽपिससाध्वसमित्थमुत्तरयामास। "देवि, प्रसीद प्रसीद; न हि न हि भवती मे जनयित्री; नाहं ते दुहिता; न च रोचिरशिलाधीश्वरस्ते प्रियतनूजो मम भ्राता।"

तदनु साकूतमेतत् तद्वचनमाकर्ण्य भद्ररामजननी हेलिनीं पुनरप्येवमनुयुङ्क्ते स्म।"अथवा त्वं मे प्रियवधूरसि? एतमभिप्रायं मनसि कृत्यैव पूर्वं त्वया मम त्वज्जननीत्वं तव च मद्दुहितृत्वं नाङ्गीकृतमिति मन्ये। अयि हेलिनि, अपि सत्यं कामयते मम वत्सं भद्ररामं भवती?"

इति तया पृष्टा हेलिनी "प्रसीदतु भट्टिणी" इत्युक्त्वा लज्जाभयतरललोचना तूष्णीं तस्थौ।

अनुत्तरयन्तीं तां संजातकोपेव पुनरपि सा सनिर्बन्धमप्राक्षीत् "ननु भणामि, हे हेलिनि, अप्यस्ति सत्यं मम तनये तव प्रेमानुबन्ध इति?"

"को वा तत्र मेऽपराधः यदि मया क्रियते स्वशरीरपोषके सुगुणशालिनि स्वस्वामिन्याः प्रियतनूसंभवे पोष्यजनसमुचितः

स्नेहानुबन्धः ? अपि नानुबध्नाति निजतनयतल्लजे प्रेमातिरेकं मम भट्टिणी ?" इति भूयः सविनयं तां प्रत्यवदत् हेलिनी ।

अथ तामालोक्य प्रभुमहिषी, "वत्से हेलिनि, किं मामेवं छलोक्तिभिरधिकमायासयसि ? विदितमेव मया सम्यक् सर्वं मत्तनुजानुरागसूचकं ते रहसि मन्त्रितम् । तत् प्रकाशं कथय मे सर्वमात्मनोऽव्यवसितम्।अलं मम पुरस्तवैतैरश्रद्धेयैर्वचन विन्यासैः।"

इति सादरं साग्रहं चानुयुक्ता हेलिनी लज्जाभयतरलतारका क्षितितलविनिवेशितजानुयुगला सगद्गदमेवमाचचक्षे ।" प्रसीदतु प्रसीदतु भट्टिणी। क्षम्यतां चानन्यनाथस्यास्य जनस्येदृशमविनयाचरणम् । विदितेऽपि सम्यङ्मयातिमहत्यभिजनविभवादिसमुद्भूते आवयोस्तरतमभावे, अनीशास्मि सर्वथा निरोद्धुं कुमारभद्रामगत मदीयमनुरागम् । अपि तु प्रभुकुमारो नैव जानाति तदनुरक्तचेतसं माम् । तस्मान्मृगतृष्णिकायां बद्धतृष्णस्य सतृष्णस्येव निष्फल एव तस्मिन् ममायमाशाबन्धः। तथापि किं वा करोमि तद्गुणनिकरविवशीकृतस्वान्ताहमेषा मन्दभाग्या ?"

इत्याकर्ण्य प्रभुमहिषी भूयोऽपि तामेवमप्राक्षीत् । "नन्वधुना त्वं पारिषनगरं जिगमिषुर्वर्तसे वा न वा ? यदि ते जिगमिषा, किं वा भवेत् तत्र तव गमनस्य कारणं ?" इति ।

ततो हेलिन्येवमभिदधे । " नातिचिरात् प्राक् आर्यलाभकमुखात् श्रीमतः प्रांशुमहाराजस्याप्रतीकार्यमस्वास्थ्यमाकर्ण्य,

मज्जनकसंपादितेनौषधविशेषेण तच्चिकित्साविधानार्थं सत्यमुद्भूतपारिषपुरगमनाभिलाषा भवामि" इति ।

"अपि सत्यमेतदेव मुख्यं प्रयोजनं तव तव गमने ?" इति तया भूयोऽप्यनुयुक्ता हेलिनी प्रत्यवोचत् । "अम्ब, इदानीं पारिषनगरमधिवसता युष्मत्तनयेन मम स्वामिना आकृष्टहृदया तद्विरहवेदनां सोढुमक्षमा तत्करकमलग्रहणसुखावाप्त्यर्थमेव दुःसाधमपीदृशमुपायं कर्तुमद्युक्तास्मि । अन्यथा पारिषपुर्याः, प्रांशुमहाराजस्य, औषधप्रयोगस्य वा चिन्ता स्वप्नेऽपि न मे मनसि प्रादुष्ष्यात् "।

इति स्वमनोगतं सर्वं यथावत् प्रकाशयन्त्यां हेलिन्यां अत्युदारप्रकृतिः प्रकृत्या तस्यामतीव वत्सला सा प्रभुगेहिनी, तस्यास्तत्र गमनविषये स्वीयां संमतिमसंमतिं वा अदर्शयन्ती केवलमुररीकृतोदासीनभावा तामेवमन्वयुङ्क्त ।

"राज्ञो रोगोपशमनकरणविषये वितथप्रयत्नेषु प्रथितप्रभावेषु बहुषु भिषग्वरेषु, कथमनधिगतौषधप्रयोगानुभवातिबालिशा त्वं त्वज्जनकोपज्ञे भेषजे निक्षिप्य महतीं श्रद्धां, प्रायः प्रक्षीणजीविताशं क्षितिपतिमुल्लाघतां नेतुं व्यवस्यसि ?" इति ।

तदनु यावत् हेलिनी निखिलभिषक्सार्वभौमेण स्वपित्रा कृच्छ्रेण संपाद्यातिजागरूकतया परिपालितस्य, तेनैव मरणसमये सर्वस्वदायत्वेन आत्मने वितीर्णस्य तादृशस्यौषधरत्नस्यामोघवीर्यतां, तत्प्रयोगेण राज्ञ आरोग्यापादने आत्मनो दृढं निश्च-

यं च प्रतिशृणोति स्म ; तावत् प्रभुमहिष्यपि निजमनस्येवमचिन्तयत्।

"मन्ये तत् सत्यमेव यदियमिदानीं हेलिनी भणति। सम्यक् ज्ञातप्रभाव एव मया श्रीमान् ज्वरार्दितनरबन्धुर्नाम भिषगग्रणीरस्या जनयिता। स च आत्मनो निर्याणसमये, "निजदुहितृनिर्विशेषं परिपोषणीया भवत्या अनन्यगतिका ममेयमेका कन्यका," इति एनां मद्धस्ते समर्पितवान्। मया च, "तथैवास्तु" इति तस्मै प्रत्यश्रावि। तदा प्रभृति मया स्वदुहितृनिर्विशेषमियं परिपोष्यते। किं च रूपगुणशीलादिभिरस्यां नितरां स्निह्यति मे चेतः। तदस्या मनोरथसंपादने नाहं परिपन्थिनी भवामि। अनेनास्याः प्रयत्नेन सपदि भवतु भूपतेः रोगशान्तिः तद्द्वारा फलतु चास्याश्चिरसंवर्धितो मनोरथवरपादपः।" इत्यवधार्य, धैर्यशालिनीं तां तत्क्षणमेव यथेष्टवस्त्रालंकारादिभिः संभाव्य परिमितपरिजनसमेतां पारिषनगरं प्रति गन्तुमनुमेने।

लब्धानुमतिः सा च हेलिनी कैश्चिदेवाहोभिः पारिषपुरमासाद्य परिचितपूर्वेण तत्रत्येन राजसचिवेन लाभकनाम्ना सादरमभिनन्दितागमना, तदनुग्रहेणैव नृपतिवरदर्शनं लेभे। अपि तु परिभूतानेकप्रख्यातवैद्यप्रकाण्डमण्डलीपाण्डित्यस्य महीपतेस्तादृशस्य रोगस्य चिकित्साकरणविषये अश्रुतपूर्वायाः बालायास्तस्याः कथं स्यात् सुलभा महीक्षिदनुमतिः। तथापि सा राजानं समुपसृत्य कृतप्रणतिस्सविनयमिदं ब्रूते स्म।

"मावजानातु मां देवो 'बालेयमकृतमतिः कथं स्यात् समर्था असाध्यस्यास्मदामयस्य शान्त्यापादने,' इति । सकलभुवनप्रख्यातयशसः आयुर्वेदपारावारपारंगतस्य ज्वरार्दितनरबन्धोर्नाम भिषक्सार्वभौमस्य तनया, तस्मादधिगतसकलविधौषधप्रयोगाहं हेलिनी नाम । तेन च निजानिर्याणसमये दत्तमस्ति मन्निकटे सकलविधव्याधिशान्तिकरमतिश्लाघ्यतममौषधरत्नं यस्य सेवनेन देवो दिनद्वयादर्वागेव स्वास्थ्यमापद्येत । यदि तथा कर्तुमहं न प्रभवामि, तदा विदधातु मां देवश्छिन्नशिरसम् । यदि दिनद्वयादेव कल्यतां नीयते देवस्तर्हि देवस्य राज्यवर्तिषु राजकुमारवर्जं यमहं पतित्वे वरिष्यामि, तं मह्यं पारितोषिकत्वेन ददातु महाराजः ।" इति अतिधीरतरं तस्याः वचनमाकर्ण्य नितरां विस्मयस्तिमितचेताः स भुवननेता सहर्षं तथैव विधातुमनुमेने ।

दत्तानुमतिश्च सा स्वकञ्चुकान्तर्निगूढां कामपि काचकूपीमाकृष्य तदन्तस्स्थादमोघवीर्याद्दिव्यौषधात् किंचित् किंचित् प्रातः सायं च राज्ञे ददौ । तदौषधसेवनाच्च स महीपालः दिनद्वयादर्वागेव कल्यतां नीतो हृष्टपुष्टांगः समजनि ।

अथान्येद्युः प्रातः स मन्देतरहर्षविस्मयाक्रान्तहृदयः तस्यै यथाश्रुतपारितोषिकादित्सया नृपकुमारवर्जं तन्नगरवर्तिनः सर्वानपि यूनस्समभेलयत् समादिशच्च तामेवं "अयि मूर्तिमद्वैद्यशास्त्राधिदेवते, अकृतविवाहानामेतेषां यूनां मध्ये निश्शङ्कं व्रियतां

त्वदभीप्सितः कश्चित् सुन्दरयुवा पारितोषिकत्वेन। तमहं निराक्षेपं तव भर्तारं करिष्यामि।”

इत्याकर्ण्य कर्णमधुरं नृपतिशासनं सद्यः सोत्कण्ठमसौ सर्वतः प्रेरितनयना उडुबृन्दमध्यविराजमानमिव कुमुदिनीवल्लभं तद्युवबृन्दमध्यवर्तिनं निजहृदयवल्लभं रोचिरिशिलप्रभुं भद्ररामम द्राक्षीत् अवादीच्च तुलितराजराजमहिमानं राजधुरीणं, “देव, अयमेव नृवरो मदभीप्सितो वरः” इत्युक्त्वा, भद्रराममालोक्य, “प्रभो भद्रराम, भार्यापदे मां भवानंगीकरिष्यतीति यद्यपि नास्ति मे निश्चयस्तथापि यावज्जीवं सन्ततभवत्परिचर्ययात्मानं सफलीकर्तुमभिलषामि” इति यावत् सविनयं एनं प्रार्थयामास; तावन्महीपतिरपि भद्रराममालोक्य, “सौम्य भद्रराम, किं विलंब्यते ? अस्मच्छासनेन त्वयाद्य भार्यात्वेनांगीक्रियतामेषाखिलजगद्भूषायमाणा योषामतल्लिका,” इत्यादिदेश।

चिरादारभ्य तस्यां सर्वथापेतानुरागः स प्रभुकुमारः सविनयं नृपमेवमाचख्यौ। “प्रसीदतु महाराजः। नाहमुत्सहे स्वीकर्तुमप्रार्थितोपगतामप्रशस्तकुलजातां मज्जननीप्रसादायत्तजीविकामस्मद्गृहपरिचारिकामेनां भिषक्कुमारिकाम्।” इति एतदस्य स्वधिक्कारवचनमाकर्ण्य हेलिनी सलज्जं नृपतिमेवमाचचक्षे। “देव, भवानपगतरोगव्यथः स्वास्थ्यमापन्न इत्येतावदेव मम परमं संमदस्थानं ; तद्गच्छन्तु यथेष्टं सर्व एव एते युवानः स्वस्ववसतिम्” इति।

स्वराष्ट्रवर्तिनीनां प्रजानां विवाहादिनिखिलकर्मकलापेषु प्रभवन्नयं तेन भद्ररामेणैवं निजशासनमवज्ञातं किंचिदप्यक्षममाणः क्षमारमणः तत्क्षणमेव बलात्कारेण तयोर्भद्ररामहेलिन्योर्विवाहं कारयामास ।

यद्यपि निजप्राणानपि तृणवत् पणीकृत्य राजानुग्रहेण सा लेभे गुणवन्तमभीप्सितं प्रभुकुमारं; तथापि कथं वा शक्यते तेन राज्ञा तस्यां तस्यानुरागं प्रवर्तयितुम् ? तदिदानीमेतेन बलात्कारविवाहेन तस्याः कल्याणोदर्कः अतिदुर्लभ इव प्रतिबभौ । अवसितमात्रे च तयोः परिणयकर्मणि, स भद्ररामो निजभार्यामाह,"अहमिदानीं निर्जिगमिषामि नगरादस्मात्; तद्भूपतेरनुज्ञां मह्यमादाय सत्वरमागम्यतां भवत्या" इति ।

सा चातिसरलबुद्धिः तथैव राज्ञः समीपं गत्वा आत्मना सह निजरमणस्य पुरान्निर्गमनं प्रार्थयामास। लब्धायां च राजानुज्ञायां, स भद्ररामस्तामेवमवादीत् । "बाले, अचिन्तितप्रवृत्तेनानेनावयोर्बलात्कारविवाहेनात्यन्तमाकुलीभूतं मे मानसं। तदहं मनःस्वास्थ्यलाभाय सांप्रतं कमपि देशं गन्तुमिच्छामि । सहसखीजनया त्वया यथापुरं मम जननीसकाशं गत्वा तत्रैवास्मन्मान्दिरे कालो नेयः।"

इति कर्णारुन्तुदं निजपरित्यागसूचकमीदृशं तस्य वचनमाकर्ण्य हेलिनी व्यथमानमानसा बाष्पाविलमुखी सगद्गदं तमेव-

मभिदधौ "नाथ, अप्यस्त्यत्र कोऽपि प्रतिवचनावकाशः भवद्वश-वर्तिन्या मे भवद्गृहदास्याः ? किन्तु इदमेवास्ति वक्तव्यं मम यदुत संप्राप्तप्रशस्तप्रभुमहिषीपदापि हतविधिनैवं विहततदुचितसकलभोगा नाहं कदापि भर्तृभक्तिविहीना भवेयम्"।

इति साधुशीलया तया स्वभार्यया बाष्पोपरुद्धकण्ठं सविनयमुक्तस्यापि प्रकृत्यात्युद्धतस्य तस्य शिलाकर्कशं चेतः मनागपि दयार्द्रं नाभूत्। स च तत्क्षणमकृततदाप्रच्छनादिसमुचितसमुदाचार एव तां विसृज्य गतः। यद्यपि सा प्रांशुमहाराजस्य रोगशान्ति विधाय तद्द्वारा निजहृदयवल्लभस्य चिराभिलषितं पाणिग्रहणमंगलमनुभूय परिपूर्णनिजमनोरथा बभूव ; तथापि सांप्रतमुपनतेन तथाविधेन स्वभर्तुर्वियोगेन नितरां विषण्णहृदया सती गत्यन्तराभावात् निजश्वश्रूसमीपमेवाजगाम।

तत्सखीमुखाद्विदितनिखिलवृत्तान्ता सापि प्रभुमाहिषी भर्त्रा त्यक्तां तथागतां तां निजस्नुषां, स्वतनूजन्मना प्रणयपूर्वमुद्वढामिव प्रशस्तकुलसमुद्भूतामिव च मन्यमाना सप्रेमबहुमानं प्रतिजग्राह तथा समाश्वासयच्च तां विविधैर्मधुरवचनैर्यथा सा नातितरां खिद्येत स्वतनयकृतेनातिवैमनस्यकारिणा तत्परित्यागरूपेणाविनयेन।

अथ यस्मिन् दिने हेलिनी स्वश्वश्रूगेहमाजगाम, तस्मिन्नेव दिवसे भद्ररामनिकटादवापि तया काचित् सन्देशपत्रिका यस्या

अनुवाचनेनाकुलाकुलमभूदस्याः मानसम् । अनुवाचनमनन्तरं सलेखहस्ता सा निजश्वश्रूनिकटमासाद्य, "अम्ब, गतः स मे नाथः अमन्निवृत्यै । अनुवाच्यतां तत्प्रहितोऽयमतिदुःखकरो लेखः," इति तस्या हस्ते तत् पत्रमर्पितवती । तत्र चैवं लिखितमासीत् ।

"यदा मन्नाममुद्रेयं तावकं करमेष्यति ।
तदा त्वं मत्प्रिया ज्ञेया स कालो न कदाचन ॥"

अथानुवाचितलेखां तां श्वश्रूमालोक्य सा, "अम्ब, अतिदारुणं खल्विदं वचनं ?" इत्युक्त्वा निर्भरदुःखाभिभूतहृदया यावत् परिदेवितुमारेभे तावत् प्रभुमहिषी तामेवं सान्त्वयति स्म ।"प्रसीद वत्से हेलिनि । क्षम्यतां चायमपराधोऽतिदुर्विनीतस्य तस्य मे तनयस्य येनानुक्षणमुत्संगे निवेश्याभ्यधिकमुपलालनीया त्वमेवमतिशोचनीयां दशामुपनीतासि। स हीदानीं मामप्येकाकिनीं विहायातिदविष्ठं देशान्तरं गतः । तद्धर्मपत्नी मत्स्नुषारत्नं त्वमप्येवं मामाकुलीकरोषि" ।

इति बहुविधं तया सबाष्पपतनं परिसान्त्वितापि सा हेलिनी भूयो भूयस्तमेव लेखमनुवाचयन्ती निर्भरशोकावेगनिरर्गलगलदश्रुपरिप्लुतमुखी पुनरेवं तामूचे । "अम्ब, कुतो मे मन्दभाग्याया आश्वासः ? श्रूयतामत्रैव लेखे लिखितमन्यदिदमस्य दृढाध्यवसितं ।

'यावद्भार्याविहीनोऽहं भविष्यामि न भूतले ।
तावन्न प्रतिगन्तास्मि प्रांशुदेशं मम ध्रुवम् ॥' इति ।"

एवमभिधाय स्वश्वश्रूः प्रतिवचनस्याप्यवकाशमयच्छन्ती निजशयनमन्दिरं गत्वा कृत्स्नमपि तद्दिनं अतिकृच्छ्रेण निनाय। अथागतायां च रजन्यां तद्गृहवासेऽपि परां विरक्तिमासेदुषी तीर्थयात्राप्रसंगेन देशान्तरं जिगमिषुः पत्रिकामेकां विलिख्य स्वाप्तसखीहस्ते दत्वा "मन्निर्गमनानन्तरमेषा पत्रिका मच्छ्वश्रूहस्ते देया" इत्यादिश्य परिगृहीतयात्रिकीनेपथ्या अविदितं गृहादेकाकिनी निर्ययौ ।

तत्र च लेखे तयैवं लिखितमासीत् । "अम्ब, आ शैशवाद्भवदनुग्रहलब्धपरिपोषणयापि, निरनुक्रोशया वो गृहदास्या युष्माकमुच्छ्वसितं प्रियतनूजः प्रभुयुवा इदानीं निस्सारितो न केवलं निजमन्दिरात् अपि तु निजदेशादपि । तत्प्रियजननी भवती च दुस्सहतनयविरहसमुद्भूतातिदुस्तरव्यसनसागरे परिक्षिप्ता । तदेतत्पापापनुत्तये **श्रीमहाजगदंबिकाक्षेत्रयात्रां** करोमि । तदनुमन्यतां कृपया भवत्या सैषा वो गृहचेटी निवेद्यतां च पात्रिकामुखेन निजप्रियतनूजन्मा यथा, 'भवदप्रीतिकारणं सा हेलिनीदानीमस्मद्गृहादपुनर्निवृत्तये गता । तदधुनात्र त्वया निश्शंकमागम्यातां' इति ।"

ततः सा च स्वीकृतयात्रिकावेषा विविधानि ग्रामनगराण्यतीत्यानेकदिवसयात्रानन्तरं श्रीमहाजगदंबिकाक्षेत्रगामिनि मार्गे

स्थितं फुल्लारामं नाम पुरवरमाससाद । तत्र च क्षेत्रयात्रार्थमागच्छतामखिलयात्रिकीसार्थानां सत्क्रियायां सन्ततं दत्तमानसा अतिधार्मिकी काचिद्वृद्धा अपूर्वयात्रिकीमेनामालोक्य सादरं निजमन्दिरं नीत्वा स्नानाशनशयनादिदानेन नितरां सच्चकार; प्रार्थयामास चैनां तत्रैव निजनिलये गमयितुं कतिचिद्दिवसान् । उररीकृत स्वाभ्यर्थनायै च तस्यै दर्शयामास तन्नगरस्थानि दर्शनीयानि तानि तानि स्थानानि । अथ तन्नगरस्थतत्तदत्यद्भुतवस्तुविशेषसन्दर्शनसंजातामन्दकौतुकां तां भूयोऽपि सा वृद्धा अवादीत्, "यद्यस्ति तेऽभिलाषो निरीक्षितुमस्मन्नरपतेः स्कन्धावारं तर्हि त्वां तत्र नेतुं कृतक्षणास्मि । तत्र च द्रक्ष्यति भवती नैकेषु समीकेषु संप्राप्तशत्रुविजयं अस्मद्भूपतेर्बहुमानभूमिं भद्ररामं नाम प्रांशुदेशीयं कञ्चन प्रभुकुमारं वीरयुवानं।"

इति अतिदवीयस्यपि तादृशे नगरे अकाण्ड एवाकर्ण्य वर्तनं निजभर्तुः अतिमात्रविस्मयसमाविष्टहृदया हेलिनी तत्क्षणमेव तद्दिदृक्षाक्षिप्तचेताः, "अम्ब, मयि महानयमनुग्रहो भवत्याः सर्वथाभिनन्दनीयः । अस्ति च मे महत् कौतूहलमत्रापि वर्तमानं अस्मद्देशीयं कञ्चन योधवरं द्रष्टुम् । तच्छीघ्रं तत्र गच्छावः।" इत्युक्त्वा तया सहाससाद तत्पुरवरस्थं शिबिरम् ।

यदा हि भद्ररामः प्रांशुमहाराजेन बलात्कारेण हेलिन्याः पाणिं ग्राहितः तस्यां अतीव संजातपरिद्वेषः तां निजजननी-

सकाशं प्रस्थाप्य स्वयं च पारिषं नगरमत्याक्षीत् ; तदा स बहुविधान् देशानटित्वा अन्ते फुल्लारामाख्यं तन्नगरवरमासाद्य तत्पुराधीशस्य सैनिकेष्वेकतमो बभूव । ततश्च बहुषु युद्धेषु प्रकटितात्मपराक्रमः प्रशस्तं सेनापतेः पदमवाप्य तस्य प्रभोः परं बहुमानभाजनं भूत्वा तत्रैव पुरे निवसति स्म । अस्मिन्नवसरे सोऽपि निजजननीसकाशात् कांचित् पत्रिकां लेभे । तत्र च एवं लिखितमासीत् ।

" वत्स भद्रराम, सरुजनयनस्येव प्रदीपशिखा, या तव, सन्दर्शनमात्रेण मनोऽव्यथामतानीत् ; यस्याः कृते च भवान् निजजननीमप्येकाकिनीं विहाय विस्मृतगृहागमनचिन्त एवं दवीयसि देशान्तरे निवसति ; सेदानीं हेलिनी गृहादस्माकाद् सन्निवृत्यै निर्गता। तच्छीघ्रमागत्य दीयतां वत्सेन निजजनन्यै चिराभिकाङ्क्षितं प्रियतनयपरिष्वंगसुखम् । "

इति लेखमनुवाच्यामन्दानन्दतुन्दिलमानसः निजजननीसन्दिदृक्षापरिवर्द्धितकुतूहलः परेद्यवि प्रातरेव निजनगरं प्रति जिगमिषुरभूत् ।

अत्रान्तरे हेलिनी च वृद्धया सह सेनानिवेशमासाद्य तत्र तत्र पङ्क्तिशः कृतव्यूहरचनान् शक्तिशूलगदायष्टिप्रासतोमरमुसलमुद्गरपरश्वध भिण्डिपालप्रमुखविविधायुधालंकृतपाणीन् धृतविचित्रतराशिरस्त्राणतनुत्राणांगुलित्राणान् योधधुरन्धरान्, रथगज-

तुरगपदातिनिवहांश्च विलोकयन्तो तत्रैव नातिदूरे, महीतलं प्राप्तं शक्तिधरं कुमारमिव विराजमानं शक्तिधरं तं प्रभुकुमारं निजमनोवल्लभं आलोक्यातिमात्रहर्षशोकपरवशस्वान्ता वृद्धामेवमभिधत्ते स्म ।

" अम्ब, नन्वेष एव स समरप्रियो योधाग्रणीर्यं नाम्ना भद्रराममस्मद्देशीयमकथयत् भवती ; यश्च मूर्तिमानिव कन्दर्पः दृष्टमात्र एवातिमात्रमाकर्षति मदीयं मानसं सह नयनयुगलेन ? "

इत्याकर्ण्य वृद्धा प्राह स्म "भद्रे, सत्यमाह भवती अतिमनोहरावयवमेनमालोक्य लोके का वा न कामयेत कामिनी? अत्र च एवं प्रसरति काचित् किंवदन्ती यथायं प्रभुतनयः प्रांशुमहाराजस्याज्ञया परिणीय निजमनसोऽप्रियामपि स्वयं कामयमानां कामपि कामिनीं तत्सहवसातिमनभिलषन् परित्यज्य तया सह निजं देशमत्रागत्यास्मन्नृपतिसकाशाल्लब्धाधिकारो वसतीति । "

एवं तया सह सँल्लपन्ती सा वृद्धा तत्र सुचिरं स्थित्वानन्तरं स्वगृहाभिमुखी प्रतस्थे । प्रत्यागमनसमयेऽपि सा भद्रामविषयकात् सँल्लापात् न विरराम । यतः सा पुनरप्येवमवादीत् ।

" भद्रे श्रूयतामिदमपरं रहस्यं । एष तावत् भद्रामः कुतश्चित् कालादारभ्य अकृतविवाहां मद्दुहितरं वत्सां देवयानीं कामयमानः प्रत्यहं वीणावेणुमृदंगादिवाद्यघोषपुरस्सरं तद्गृहवातायन-

परिसरे आगत्य कृतनुतिस्तामेवं प्रार्थयते। ‘ अयि रमणीमाणिमतल्लिके, त्वदवलोकनात् प्रभृति अभिभूतोऽस्मि नितरामहमनंगेन। तत् प्रसीद मयि दर्शयितुं प्रणयम् । निद्रामुद्रितनयने सति सर्वस्मिन्नपि बन्धुजने, रहस्यत्रागमिष्यन्तमेकाकिनं मां प्रणयेनांगीकुरुष्व । तदा यद्यत्त्वमभिवाञ्छसि तत्तदनुपदं दास्यामि ’ इति

आबाल्यादतीव मया सुशिक्षिता कृतमतिः सा मे वत्सा कृतविवाहस्य तस्य रहःप्रणयमात्ररूपां एतां प्रार्थनां सर्वथा नांगीकुरुते । तथापि सः श्वः प्रातरेवास्मान्नगरान्निर्जिगमिषुः पुनरपि सनिर्बन्धं तामेवं दूतीमुखेन प्रार्थयते । ‘ अद्य रजन्यामवश्यमहं भवत्या रहसि प्रणयपुरस्सरमंगीकार्यः । यतोऽहं जिगमिषामि श्वः प्रातरेव मदीयं नगरम्’ इति ।

नूनं नानुमंस्यते अस्मिन् दिवसेऽपि अविनयशीलस्यास्यानुनयवचनं साधुशीला मे वत्सा । तेन च विफलीकृतप्रयत्नेन खण्डिताशेनाद्य पुरान्निर्गन्तव्यमिति मन्ये” इति ।

एतत्सर्वमाकर्ण्य हेलिनी निजमनोरथावाप्तये कंचिदुपायं मनसि चिन्तयन्ती सविनयं तामेवं प्राह स्म । “ अम्ब, अहमेव सा मन्दभाग्या हेलिनी नामास्य भद्ररामस्य भार्या, या तेनैवं निर्दयं त्यक्ता । तदर्थमेवाद्य मया क्षेत्रयात्राव्याजेनैवं देशाटनं क्रियते । यदि मय्यनाथायामनुकंपा भवत्याः तर्हीदं मद्वचनमनुष्ठीयतां भवत्या भवद्वत्सया च येनानुष्ठितेन स मे वल्लभः मय्यु-

द्भूतानुरागो भूयो मां भार्यात्वेन स्वीकरिष्यति ; भवत्या दुहितुश्च न मनागपि शीलभ्रंशो जायेत । तद्यथा ।

प्रथमं प्रवर्त्यतां भवत्या सर्वत्रात्र नगरे हेलिनी नाम रोचिशिलप्रभोर्भद्रामस्य महिषी महिषवाहनपुरातिथीबभूवेति कश्चित् प्रवादः यस्य श्रवणात् स मे दयितः भद्रामः निश्शंकं भवत्तनयां देवयानां विवोढुमनुमन्येत । ततश्च, 'एवं निर्बध्नतः प्रभुकुमारस्य तव प्रणयं विहन्तुं नाहमुत्सहे । तदद्य रजन्यामवश्यं त्वया मच्छयनगृहमागन्तव्यं,' इति तस्मै प्रेष्यतां च दूतीमुखेन प्रतिलेखः । यस्य निरीक्षणात् अतिमात्रप्रवृद्धमन्मथः स रात्रौ भवद्दुहितृमन्दिरमागमिष्यति । तदा च स्वीकृतभवद्दुहितृनेपथ्याहं कन्दर्पाक्षिप्तचेतसं तं सरसवचनैः वशीकृत्य, तद्धृतमंगुलीयकं पारितोषिकत्वेन लब्ध्वा तदभीष्टं पूरयिष्यामि । स च मां देवयानेत्येव मन्वानः स्वपुरं यास्यति लब्धे च मया तदंगुलीयके सर्वमेव मया लब्धं स्यात् । यतः प्रतिज्ञातमेव पुरानेन ।

'यदा मन्नाममुद्रेयं तावकं करमेष्यति ।
तदा त्वं मत्प्रिया ज्ञेया स कालो न कदाचन ॥' इति ।

तदधुना अगतिकायाः मम एतावन्तमुपकारं कर्तुमर्हति भवती भवत्तनया च । अनेन च चिरवियुक्तदंपतीसंगमनरूपेण कर्मणा लभ्यते न केवलं महत् पुण्यमपि तु यथेष्टं मत्तः पारितोषिकमपि ।"

इति श्रुत्वा तस्यां नितरां दयार्द्रहृदया सा वृद्धा तत्तनया च तथैव सर्वं तस्याः वचनं अनुष्ठातुमन्वमन्येताम्। अथागतायां च त्रियामायां, हेलिनीनिधनोदन्तश्रवणनिर्वृतचेताः भद्ररामः निजमनोनुकूलं देवयानायाः प्रतिलेखमवाप्याधिगतमन्देतरानन्दः अभिनवतरुणीमणिसमागमोत्कण्ठालुण्ठितमानसः दिव्यगन्धवस्त्रमाल्यादिशोभितगात्रः एकाकी तस्याः शयनमन्दिरमुपाजगाम।

स्वीकृतदेवयानावेषा हेलिनी च तथागतमेनमभ्युत्थानादिना संभाव्य निजशयनार्धे उपवेश्य भक्ष्यभोज्यपानादिभिः सन्तोष्य, क्षणं वीणावादनेन, क्षणं मधुरगीतेन, क्षणं परिहासकथाभिः, क्षणं सरससंभाषणेन च तस्य मनसः प्रीतिं तथा उत्पादयामास यथा स सद्य एव तद्वशगो भूत्वा तां धर्मभार्यात्वेन स्वीकर्तुं समनुमेने।

यद्यपि तस्मिन् समये निजदयितेन विहितं सर्वमपि प्रणयचेष्टितं केवलं देवयानाबुद्ध्या, तथापि अश्रुतपूर्वैस्तस्य तादृशैः प्रणयवचोभिः अमन्दमवाप सम्मदं हेलिनी।

'चिरपरिचयादवज्ञा सन्ततगमनादनादरो भवति॥' इति लौकिकोक्तिरविसंवादिन्येव। यतः निजसौन्दर्यावधीरितकुसुमशरकुटुम्बिन्यां सरससंभाषणचतुरायां अतिविनयशालिन्यामपि हेलिन्यां आ बाल्यात् तस्य परिचयात् अश्रुतचरत्वाच्चास्यास्सरससंलापस्यातीवानुरागविहीनमभूदितः पूर्वमस्य हृदयम्। इदानीन्तु

वेषान्तरपरिच्छन्नाया अपि तस्या एव रूपलावण्यादिकमस्यातीवासेचनकमभूत् । यदि पूर्वमेव तत्वतो भद्ररामोऽज्ञास्यदीदृग्गुणविशिष्टामातिचतुरभाषिणीं हेलिनीं, तन्नियतमकरिष्यदेव तस्यामनन्यसाधारणमनुरागम् । स तु इतः पूर्वं तस्यां अतीवापेतस्पृहः तन्मिथस्संभाषणस्याप्यवकाशं न ददौ । तेन सर्वेऽपि तस्याः गुणास्तस्मिन् काननचन्द्रिकासदृशतां प्रापुः ।

अथ देवयानविषधारिणी हेलिनी तमालोक्य, "हृदयवल्लभ, संप्रति प्रभातप्रायैवेयमविदितगतयामा यामिनी । भवांश्च निजदेशं गन्तुमुद्युक्तोऽस्ति । क्षणमपि भवद्वियोगदुःखं नाहं सोढुमुत्सहे । चिरवियुक्तजननीदर्शनोत्कण्ठितस्य भवतः प्रयाणेऽपि नाहं परिपन्थिनी भवितुमिच्छामि । तदीयतामिदं मे भवत्प्रणयसंस्मारकं अंगुलीयकम् ; ध्रियतां चेदं तत्पदे मद्धृतमंगुलीभूषणम् ।" इत्युक्त्वा तन्नामाङ्कितमंगुलीयकमादाय, प्रांशुनरपतेश्चिकित्साकाले तेनैव पारितोषिकतया दत्तं तदाप्रभृति धृतं स्वीयमंगुलीयकं तत्करशाखायामर्पितवती । ततः तद्विश्लेषासहिष्णुरपि भद्ररामः जननीदर्शनाक्षिप्तहृदयतया कथंकथमपि तामापृच्छ्य तत्प्रातरेव स्वपुराभिमुखः प्रतस्थे ।

हेलिन्यपि स्वानुष्ठितस्य उपायस्य सविशेषतया तत्संपादनाय तामपि देवयानां जननीसहितां आदाय प्रांशुमहाराजसविधं जिगमिषुः प्रस्थिता यावत् पारिषपुरीमाससाद, तावत् स नरनाथः विप्रोषिततनयायाः भद्ररामजनन्याः समाश्वासनार्थं रोचिःशिख-

पुरमेवाययौ । फुल्लारामे इतः पूर्वं तयैव हेलिन्या प्रवर्तितः हेलिनीमरणप्रवादः सर्वत्र दिक्षु प्रसृत आसीत् । तस्मात् रोचिरिशिलपुरं पुनरागतामपि कृतयात्रिकीत्रर्णिकापरिग्रहां तां न कोऽपि बुबुधे । प्रांशुमहीपतिरपि स्नुषातनयवियोगदूयमानमानसां रोचिरिशिलप्रभुमहिषीं विविधैः सान्त्ववचनैराश्वास्य स्वप्राणसंत्राणरूपां हेलिन्याः महतीमुपकृतिमनुस्मृत्य, सकलसद्गुणपूर्णायाः अतिविचक्षणायाः तस्याः निधनोदन्तश्रवणादतीव खिन्नचेता बभूव !

अत्रान्तरे निजजननीसंदिदृक्षया फुल्लारामात् रोचिरिशिलनगरमायातः भद्ररामः सोत्कण्ठं यावत् स्वमातृसविधमुपययौ, तावत् तत्र स्वस्वामिनं प्रांशुमहाराजमालोक्य भयविस्मयलज्जातरलमानसः सविनयमेनमुपसृत्य साष्टांगपातं प्रणनाम । तत्प्रणामसमनन्तरं निजजनयित्रीमपि ववन्दे । चिरवियुक्तं स्ववत्सं दृष्ट्वेव धेनुः, चिरप्रवासात् प्रत्यागतं प्रणतमेनमालोक्य सा बाष्पांबुपरिप्लुतनयनयुगला सादरमाश्लिष्य, "अयि वत्स भद्रराम, अप्यागतोऽसि कुशली ?" इति सगद्गदमेनमन्वयुङ्क्त ।

अस्मिन्नवसरे नृपासन्नवर्ती तत्प्रधानसचिवः लाभकाख्यस्तमालोक्य, "प्रभुकुमारक, न शोभनमाचरितं त्वया यदुल्लंघ्यास्मन्नरपतिशासनं, अविगणय्य निजमातरं, दूरीकृत्य पूर्वसौहृदं, स्वीकृत्य च निरनुक्रोशतां, भवता सकलसद्गुणरत्नपेटिका त्वदर्थे तृणीकृतनिजजीविता तरुणीललामभूता हेलिनी नाम सा तपस्वि-

नी इत्थं दुर्विषहभवद्विरहदहनदन्दह्यमानमानसा नामशेषां गतिं गमिता ।"

राज्ञः समक्षमेवं स्वदोषानुद्धोषयतो लाभकस्य वचनमाकर्ण्यातिमात्रानुशयानुविद्धहृदयो भद्ररामो नितरां शुशोच । प्रांशुधरणीरमणोऽपि स्वभार्यात्यागविषये सानुतापं तमालक्ष्य, किञ्चिदुद्भूतकोप इव ब्रूते स्म ।

"रे रे अविनयशील, भद्रराम, सत्यमाह सांप्रतं अस्मत्प्रियसचिवः आर्यलाभकः । जन्मान्तरसुकृतवशादेवेह जगति ईदृशः सकलगुणनिधिः साध्वी भार्या लभ्यते । अकृतसुकृतलेशेन त्वया पुनः हस्तप्राप्तापि तादृशी ललनामतल्लिका, मल्लिकामालेव मर्कटहस्तगता, नीता नामातिशोच्यां दशाम् । मदाज्ञापरिभाविनं जायाद्रोहिणं त्वां नियतमद्यैव तीव्रदण्डेनायोजयिष्यं यदि नास्मरिष्यं गुणगणान् देवभूयं गतस्य सुगृहीतनामधेयस्य भवत्पितुः रोचिरिशिल्पप्रभोः तन्महिष्याश्च । तदधुना क्षान्तं मया सर्वं भवद्भिरनुष्ठितम् । दत्तं च मया यथापुरं ते मदनुग्रहविशेषसूचकं अधिकारपदम् ।"

इत्यवसितवचने महीपतौ, भद्ररामः पुनस्तं सविनयं प्रणम्य बद्धांजलिपुटस्सकातङ्कं तन्निकट एव तस्थौ । तदा स सार्वभौमः स्वेन पूर्वं हेलिन्यै पारितोषिकत्वेन दत्तं स्वीयमंगुलीयकं तस्य भद्ररामस्यांगुलौ दृष्ट्वा, निपुणतरं निरूप्य चैवमचिन्तयत् ।

"अहो! कथमस्माभिः पारितोषिकत्वेन हेलिन्यै दत्तपूर्वमेतदंगुल्याभरणं अस्यांगुलौ दृश्यते? तद्दानसमये सा किल मह्यमेवं प्रतिजानीते स्म 'देवेन प्रीत्या प्रसादीकृतमेतदंगुलीभूषणं आपदमन्तरेण न कदापि मत्करशाखायाः वियोजयिष्यते' इति। तन्नियतमनेन दुष्टाशयेन तस्यां पापमाचरितं"। इत्यवधार्य अतिमात्रप्रवृद्धमन्युः तमेवं पप्रच्छ। "अरे पापबुद्धे, कुतस्त्वया लब्धं हेलिन्या धृतपूर्वमेतदंगुलीयकम्।"

इति श्रुत्वा भीतभीतः स सवेपथुरेवमभिदधाति स्म "देव इदमंगुलीयकं कुत्रचन नगरे वीथीमार्गेण संचरति मयि, हर्म्यपृष्ठस्थया कयाचन कामिन्या मय्युत्पन्नानुरागया वातायनमार्गेण मह्यमुत्सृष्टं। नाहं सत्यं विवाहदिवसादारभ्य अद्यावधि हेलिन्या मुखमद्राक्षम्" इति साश्रुलोचनो रुरोद। तथापि तस्यातीवासंभाव्यां तां कथामश्रद्दधानः स नरनाथः स्वसमीपस्थान् भटानालोक्य, "शीघ्रं बध्यतां बध्यतां चायमशुभाचारः" इति यावदादिदेश, तावत् जननीसनाथा देवयाना तत्रागत्य नरपतिमेवं प्रार्थयामास।

"देव, अयं तावत् भवत् पुरोवर्ती प्रभुकुमारः एकदा मन्मन्दिरमागत्य, 'नियतं त्वामहं परिणेष्यामि' इति सशपथं प्रतिश्रुत्य रजनीमेकां मया सह सरससंभाषणादिभिर्गमितवान्; तदद्य यथा मामेष उद्वहेत् तथा क्रियतां कृपया देवेन"।

इति श्रुत्वा भद्ररामः तेन नरपतेः प्रभूतं कोपमाशंकमानः, "सर्वथा नैतत् सत्यं" इति यदा तस्याः वचनं प्रत्याचख्यौ

तदा सापि देवयाना, “यदि मम वचसि देवपादानामविस्रंभः, तर्हि निपुणं निरूप्यतामस्यांगुलौ धृतं मद्दत्तमंगुलीयकं, अनेनाभिज्ञानार्थं मह्यं दत्तमेतन्नामांकितमेतदंगुलीयकं च” इति हेलिनीदत्तां तदंगुलिमुद्रां राज्ञेऽदर्शयत्।

तथापि भद्ररामांगुलिस्थमंगुलीयकमितः पूर्वं हेलिन्यै पारितोषिकत्वेन वितीर्णं स्वीयमेवांगुलिभूषणमिति सम्यक् संजातप्रत्ययः भूपतिः तस्यामपि कपटमाशंकमानः, “गृह्यतामेषा चासत्यवादिनी योषाधमा”, इति भटानादिक्षत्।

तदा देवयाना मनागप्यबिभ्यती पुनरपि नरपतिमेव मभ्यवक्त स्म। “देव, मदीयमेवेदं तद्धृतमंगुलीयम्। यदि तत्र देवस्य कापि विशयकणिका, तदनुजानातु देवः मज्जननीमद्यैवानेतुं तं जनं यस्मादेतन्मया क्रीतम्”, इति सधाष्ट्र्यं तस्या वचनमाकर्ण्य विस्मितचेता नरपतिः तथैवास्या जननीं तत्क्षणं तस्य जनस्यानयनायानुजज्ञे। सा च वृद्धा बहिर्निर्गत्य क्षणात् प्रतिनिवृत्य च हेलिन्या समं नरपतिसविधमाययौ। चिरप्रवासादागतस्यापि भार्याघातकत्वेनाभिशस्तस्य क्षणाद्वधस्तंभं नेष्यमाणस्य निजतनयस्य तादृशीमतिकष्टां दशामालक्ष्य गाधेतरविषादसागरनिमग्नहृदया रोचिश्शिलप्रभुमहिषी तत्राकस्मादागतां प्रियवधूं हेलिनीमालोक्य मन्देतरानन्दविस्मयाक्रान्तस्वान्ता किंचिदपि वक्तुं न शशाक।

नरपतिरपि स्वपरमोपकारिणीं तां सजीवामालोक्य जाताधिकानन्दः, "अपि सत्यमित्थं सा भद्ररामधर्मपत्नी हेलिनी?" इति सविस्मयमन्वयुङ्क्त। तदा हेलिनी, भद्ररामेण तदानीमपि भार्यात्वेनानंगीकृतत्वात् आत्मानं भद्ररामममहिषीशब्दभाजनममन्यमाना, नृपमेवं प्रत्यभाषत "नाम्नाप्यहं साक्षाद्भद्ररामममहिषी ; अपि तु तन्महिषीशब्दमात्रधारिणी केवलमस्मि" । इति तयोक्ते, पूर्वमेव तस्या विषये अमन्दानुतापाभिभूतहृदयः भद्ररामः तामालोक्य "प्रसीद, प्रसीद, हृदयवल्लभे ; न केवलं नामतः अपि तु वस्तुतोऽपि भवति भवती मे प्रियमहिषी।"

इति तन्मुखान्निस्सृतमेतद्वचनामृतमास्वाद्य कर्णाञ्जलिपुटैरनल्पसंमोदभरभरितमानसा हेलिनी, "प्राणनाथ, अत्याश्चर्यचर्यं त्वां बदेवाज्ञासिषं यदाहमेतद्देवयानावेषधारिणी त्वत्सरसवचनामृतास्वादभाजनमभूवम्। निरीक्ष्यतां मह्यं भवता प्रेषितपूर्वमिदं पत्रं, यत्र एवं लिखितं।

"यदा मन्नाममुद्रेयं तावकं करमेष्यति।
तदा त्वं मत्प्रिया ज्ञेया स कालो न कदाचन॥" इति।

मयापि तथैवोपायैर्भवदंगुलिधृता नाममुद्रा अधिगता तस्मादितः परं यथाश्रुतमप्यंगीकरोषि मां भवत्प्रियमहिषीम्?" इत्युक्तस्सच प्राह स्म।

"तस्मिन् दिवसे निशीथे मया सह कृतसंल्लापा भामिनी भवत्येवेति सोपपत्तिकं यदि मां भवती प्रत्याययति, तर्हि त्वं नियतं मे प्रियतमा भविष्यसि" इत्युक्ते, सापि तदर्थमेव फुल्लारामनगरादानीताभ्यां ताभ्यां वृद्धातत्तनयाभ्यां तत्र प्रवृत्तं सर्वमुदन्तं सविस्तरं प्रख्याप्य, सैवेयमिति प्रत्याययामास।

एतत् सर्वं श्रुत्वा प्रांशुमहीपतेरपि विस्मयोत्फुल्लहृदयः हेलिन्याः मतिवैभवं श्लाघमानः, चिरवियुक्तयोः तयोर्दंपत्योः परस्परप्रीतिपुरस्सरं पुनस्समागमेन नितरां संतुष्टचित्तो बभूव।

अतिदवीयसोऽपि निजदेशात् हेलिन्यर्थमागत्य तयानुष्ठिते साहसिकैकनिष्पाद्ये तादृशे उपाये सहकृत्वतां गतां देवयानां तज्जननीं चालोक्यातीव प्रीतचेताः मनुजनेता, तदुपकारानुरूपं पारितोषिकं दातुं यदा मनो दधे, तदा हेलिनी राजानं प्रणम्याभिदधे।

"देव, मम परमोपकारिण्याः प्रियवयस्यायाः अस्याः देवयानायाः अनुरूपवरप्रदानादृते नान्यत्पारितोषिकं मम तोषकरं भवेत्। तच्छीघ्रमादिश्यतामनुरूपः कश्चिदत्रत्यः प्रभुकुमारकः अतुलकपिलकुलसमुद्भूतायाः अस्याः करकमलं ग्रहीतुम्। तथा कृते ममापि भवेत् आवयोरेकस्थानवसतिजन्यो भूयान् संमदः।"

सविनयमेवं तयाभ्यर्थितः प्रांशुचक्रवर्ती तथैव सकलसद्गुणसंपन्नं कंचित् प्रभुयुवानमाहूय शुभे मुहूर्ते सर्वजनसमक्षं देवयानायाः पाणिं ग्राहयामास ।

एवं हेलिनी बाल्ये निजजनयित्रा मरणकाले सर्वस्वदायत्वेन दत्तेनामोघवीर्येण औषधवरेण चिराभीप्सितं अतिदुर्लभं रोचिरिशिलप्रभुमहिषीपदं प्राप ।

“प्रारभ्यते न खलु विघ्नभयेन नीचैः
प्रारभ्य विघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः
प्रारब्धमुत्तमजनाः न परित्यजन्ति ॥”

(*Nitisataka of Bhartrihari.*)

चेन्नपुर्यां ‘ओरियण्टल्’ मुद्राक्षरशालायां मुद्रितं

ERRATA IN ALL'S WELL THAT ENDS WELL.

Page.	Line.	For	Read.
1	8	अपरः	अपरः,
,,	9	सार्वभौमः,	सार्वभौमः
2	16	भाजनम् ।	भाजनम् ।"
3	14	निज भर्तृ	निजभर्तृ
,,	16	हेलिनी	हेलिनी-
4	16	उपलब्धा	उपालब्धा
11	6	आत्मनोव्यवसितम् ।	आत्मनो व्यवसितम् ।
,,	11	निरोद्धु.........गत	निरोद्धुं.......गतं
12	13	अन्वयुङ्क्त	अन्वयुङ्क्त
15	1	त्वदभीप्सितः	त्वदभीप्सितः
17	14	तथागता ता	तथागतां तां
18	4	चवं	चैवं
,,	9	इत्युक्ता	इत्युक्त्वा
20	6	उररीकृत स्वाभ्यर्थ	उररीकृतस्वाभ्यर्थ
,,	16	वर्तमान	वर्तमानं
,,	17	तच्छीघ्र	तच्छीघ्रं
21	15	निजनगर	निजनगरं
,,	18	पङ्क्तिशः....तोमरा·	पङ्क्तिशः......तोमर·
,,	19	परश्वथ भिण्डिपाल	परश्वथभिण्डिपाल
,,	20	विचित्रतराशि...गुलि	विचित्रतरशि....गुलि
22	10	प्राशु	प्रांशु
24	13	यास्यति लब्धे....के	यास्यति । लब्धे.....के
25	17	चिरपरिचयात्	अतिपरिचयात्
26	18	सविशेषतया	सावशेषतया
28	1	नामशेषा	नामशेषां
,,	3	नुद्घोषयतो	नुद्घोषयतो
,,	8	ईदृशः	ईदृशी
29	14	बध्यतां बध्यतां	बध्यतां वध्यतां
30	9	मभिवत्ते	मभिधत्ते
,,	11	अत्रानेतुं त	अत्रानेतुं तं
32	2	यदि मा	यदि मां
,,	16	प्रभुकुमारक	प्रभुकुमारकः
33	2	सर्वजनसमक्षं-	सर्वजनसमक्षं

NAMES OF CHARACTERS.

पात्राणां नामानि ।

MALES.	पुरुषाः
1. Hamlet.	=हेमललाटः
2. Claudius.	=कैलाधिकः
3. Horatio.	=घोरास्यः
4. Marcellus.	=मर्षशीलः
5. Polonius.	=पालननयः
6. Priam.	=प्रयमः
7. Gonzago.	=गुणश्लाघ्यः
8. Lucianus.	=लसन्नासः
9. Laertes.	=लयरातिः
FEMALES.	स्त्रियः
1. Gertrude.	=गर्धरूढा
2. Ophelia.	=उत्पलाक्षी
3. Hecuba.	=हेयगुप्ता
4. Babtista.	=भावप्रतिष्ठा
PLACES.	स्थानानि
1. Denmark.	=दैन्यमारकं
2. Troy.	=त्रायं
3. Vienna.	=वियाना
4. England.	=अंगलभूमिः

॥ श्रीः ॥

हेमल्लाटचरितम् ।

———:o:———

"यां चिन्तयामि सततं मयि सा विरक्ता
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः
अस्मत्कृते च परितुष्यति काचिदन्या
धिक् तां च तं च मदनं च इमां च मां च ॥
(*Nitisataka*)

अस्त्यत्र धरातले निजसंपत्समृद्ध्यानिशायितपुरन्दरपुरविभव सैन्यसारसततसंरक्षितं **देन्यमारकं** नाम देशरत्नम । तत्र च दिगन्तविश्रान्तकीर्तिः अतिसुन्दरमूर्तिः साधुचरित्रः सकलसद्गुणगणालंकृतः **हेमल्लाटो** नाम राजा बभूव । स च मकरकेतोः संचारिणीं जगद्विजयवैजयंतिकामिव सकलजनमनोहारिणीं आरूढयौवनां **गर्धरूढां** नाम सर्वावयवसुन्दरीं कामपि प्रभुवरकुमारिकां निजमहिषीत्वेन स्वीचकार । अनुबभूव च सुचिरं तया सह विविधान् दिव्यान् भोगान्; अवाप च तस्याः सांगमिवानंगमवनितलमवतीर्णमखिलजननयनानन्ददायिनमेकं तनयतल्लजम् । हर्षभरनिर्भरमानसोऽवनिपतिस्तमपि चक्रे **हेमल्लाट** इति स्वेनैव नाम्ना । शुक्लपक्षचन्द्रमा इव दिनेदिने परिवर्धमानः कुमारहेमल्लाटोऽपि शैशवोचितैः तैस्तैः क्रीडाविशेषैः गजस्कन्धाश्वपृष्ठारो

हणरथचर्यादिभिः अनितरसाधारणैः नृपकुमारोचितैः परिचयैः अस्त्रास्त्रिशस्त्राशस्त्रिदण्डादण्डिबाहूबाहविप्रभृतिनिखिलखुरलीकेलिभिश्च मातापित्रोर्मानसमुल्लासयन् निखिलनीतिविद्यानिष्णातनिजधिषणः क्रमेण यौवनपदवीमारुरोह । अनुपदमेव कालदेशविदा भगवता कुसुमायुधेन प्रेरितः निजगुणशीलवयोरूपानुरूपामभिरूपां **उत्पलाक्षीं** नाम निजपितुः प्रधानसचिवस्य **पालननयस्य** तनयां विनयाभिरामां रामां कामयांचक्रे । ललितपदबन्धमंजुलचाटुवचनजालजटिलैः आत्माशयावबोधकैः अनंगलेखैः अंगुलिमुद्राप्रेषणैश्च असकृत् तां प्रार्थयांचक्रे । तच्चाटुरचनानुरंजितमानसा सापि तन्वंगी सानन्दमंगीचकार तत्प्रार्थनां। भंगीविशेषयुक्तैः आत्मानुरागसूचकैः प्रतिलेखैश्च तमानन्दयामास ; प्रतिदिनमेवं वृद्धिमुपगते तयोः परस्परानुरागे आसन्नप्राये च तयोः पाणिपीडनावसरे कदाचित् नीरोगदृढगात्रो राजा हेमललाटः निजकेलीकानने सुप्तः अतिक्रूरेण महता कृष्णसर्पेण दष्टः पंचत्वमगमदिति वार्ता कुमारस्य श्रवणपथमविशत् । अत्यन्तपितृवत्सलः सुकुमारस्वभावः कुमारहेमललाटः अचिन्तितोपनतं अतिदारुणं तादृशं स्वपितृनिधनमाकर्ण्य दुस्सहशोकहुतवहज्वालाजालावलीढहृदयः मात्रादिभिराप्तजनैः भृशमाश्वासितोऽपि आहारविहारादिक्रियासु अपेतस्पृहः रात्रिन्दिवं अननुभूतनिद्रः तदेव चिन्तयन् कृच्छ्रेण कालं निनाय ।

राज्ञः जीवनकाले या अन्यादृशभर्तृवात्सल्यभरितेव क्षणमपि तद्विश्लेषदुःखं सोढुमपारयन्ती प्रतिक्षणं तदुत्संगलग्ना बभूव; सैव गर्भरूढा इदानीं स्मर्तव्यशेषतां गते निजवल्लभे, दूरीकृत-भर्तृशोका वीतलज्जा मासद्वयादर्वागेव पतित्वेन स्वीचकार कला-धिकं नाम राज्ञो यवीयांसं भ्रातरं अपगतमर्यादं अपेतस्नेहं राज्यतृष्णापरिभूतचेतसं, मनसि वचसि काये चातिक्रूरं शूरमा-निनम्। तत्क्षणमुद्भूच्च मनसि महती शंका केषांचित् तत्पुरवा-स्तव्यानां यदयमेव कलाधिकः राज्ये रूढगर्धः गर्भरूढायाः प्रेर-णया ज्यायांसं भ्रातरं राजानं तीक्ष्णगरलदानेन मारितवानिति। कुमारोऽपि स्वमनस्येवमचिन्तयत्। "अहो! मे मातुः दुः-शीलता, निरनुक्रोशता, धृष्टता, कृतघ्नता, निस्त्रपता च। यदेषा योषावेषा राक्षसी निसर्गेण पत्नीप्रेमभरितचेतसि अतिविमलयशसि अप्रातिमतेजसि निजजीवितेश्वरे एवमकाण्ड एव दिष्टदोषात् नष्ट-जीविते सत्यपि, मासद्वयाभ्यन्तर एव निजतनयसधर्माणं पत्युः कनीयांसं सोदरं अभजत पतित्वेन। धिगिमां मज्जनयित्रीमपि अतिलंघितलोकमर्यादां अपेतलज्जां वृषस्यन्तीं पुनर्भुवम्। कथं वेयमतिसुन्दराकृतेः सुगुणशीलस्य तादृशस्य मम पितुः प्रथमं महिषी भूत्वा इदानीमालेख्यशेषतां गते तस्मिन्, गुणलेशविव-र्जिताय दुर्दर्शनाय तद्भ्रात्रे कलाधिकाय स्पृहयालुरासीत्? अथ वा स्त्रीणां विषये किमिदं चित्रम्? उक्तं चाभियुक्तैः—

"नासां कश्चिदगम्योऽस्ति नासां च वयसि स्थितिः ।
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ १ ॥
जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥ २ ॥
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥ ३ ॥
रहो नास्ति क्षणो नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद नारीणां सतीत्वमुपजायते ॥ ४ ॥"

इत्युक्त्वा स पुनरेवमचिन्तयत् । "केयमविनयता अस्मत्कुलपांसनस्य कलाधिकनाम्नोऽस्मत्पितृव्यगन्धिकस्य ? य एष राज्यलोभाकृष्टचेताः पितृसमस्य निजज्येष्ठभ्रातुः धर्मदारानप्यस्मन्मातरं निजजायापदे निवेशयति मन्यते च मामनभिज्ञमेतत्कपटप्रबन्धानाम् । भुजंगदष्टो मृतोऽस्मत्पितेति यदानीं सर्वत्र चलति काचित् प्रथा, सत्यैव सा नूनं प्रकारान्तरेण । यतः सोऽयमेव महाभुजंगः येन कठोरगरलप्रयोगेण मारितः स तपस्वी मज्जनयिता । किं वा पापं न कुर्यादेष महापातकी जाल्माग्रणीः ? सांप्रतं न पीडयति मन्मनस्तथास्य मद्राज्यापहरणं यथास्य मत्पितृमारणं मातृभिगमनं च । तदेनं दुष्टचेष्टितमनिहत्य अनिर्यात्य च मत्पितृमारणकारणं वैरं न कदापि मम मनसः शान्तिर्भविष्यति । अपि तु सम्यगविज्ञाय कार्यतत्वं सहसा तस्मिन् पापाचरणं भृशमनुचितं भवेत् ।"

इत्येव चिन्ताकुलचेतसि तस्मिन् गमयति कतिचित् दिवसान्, कदाचित् **घोरास्यो** नाम कुमारस्य प्रियसुहृत् अन्यैश्च कतिपयैराप्तैः प्रासादरक्षिभिः सह समागत्य रहसि तमेवं व्यजिज्ञपत्। "अयि सुहृन्मणे राजनन्दन, श्रूयतां महदिदमाश्चर्यम् । अद्य अतीतेषु त्रिष्वपि वासरेषु अनुक्रमेण राज्ञस्तव पितुः प्रासादबहिर्द्वारवेदिकायां स्थितैरेभिर्यामिकैः सह मया निशीथसमयेऽवलोकितं आप्रपदीनकंचुकावृतनिखिलशरीरं सर्वप्रकारैरपि नाकातिथेस्तव पितुः महाराजस्याकारसंवादि, कोपविषाददूषितशोभं लंबमानसितासितदीर्घकरालकूर्चं वदनमुद्वहत्, किमपि भूतम् । गते दिनत्रयेऽप्येवं तस्यामेव वेलायां तादृग्वेषयुतमेवास्मत्समक्षमाविर्भूय मौनमुद्रामुद्रितमुखमेव पुनरप्यदर्शनीभवति । 'कस्त्वं ? किं तवागमनकारणं ?' इति सकृदस्माभिः पृष्टः स पिशाचः यावदस्मान् प्रतिवक्तुमिव प्रयत्नमकरोत्, तावत् तारं ताम्रचूडरवं समाकर्ण्य चकितचकितः सत्वरमपक्रम्य नयनविषयातीतोऽभवत् ।।" इति ॥

श्रुत्वेममश्रुतपूर्वं अत्यद्भुततमं वृत्तान्तं, अनल्पविस्मयस्तिमितहृदयः स एवं अचिचिन्तत्। "नूनमेषः पितृव्यहतकेन मारितस्य मत्पितुः प्रेतकः वैरनिर्यातनादृते मनसः शान्तिमविन्दन् मां रहसि किंचित् विवक्षुः एवं प्रादुर्भवति । तदवश्यं मया अद्य रजन्यां तत्र गत्वा जागरूकेण स्थातव्यम् ।" इति संप्रधार्य रात्रागमनं प्रतिपालयन्नासीत् । अथागतायां च निशीथिन्यां

कुमारहेमललाटः निजप्रियमित्रेण घोरास्येन विश्वासपात्रेण मर्ष-शीलनाम्ना यामिकेन च साकं पितुः प्रासादबहिर्द्वारवेदिकायां कृतावस्थितिः, निर्दिष्टं निशीथसमयं प्रतिपालयन् यावत् तदानीन्तनातिशीतलासह्यहिमपातमधिकृत्य ताभ्यामुभाभ्यां सह संलपन्नास्ते स्म ; तावत् पिशाचतां गतस्य निजपितुः यथानिर्दिष्टरूपा व्यक्तिः व्यक्तीबभूव । तद्दर्शनमात्रेण नरपतिनन्दनः भयविस्मयतरललोचनः, "ममाहितं चिकीर्षन्नागतः कश्चिदेष दुष्टपिशाचः", इति संभ्रान्तहृदयः तस्मादात्मानं मोचयितुमखिलान् देवान् अस्तौत् । क्षणान्तरे च किंचित् किंचित् गलितभयः धैर्यमवलंब्य यावन्निपुणतरं निरूपयति स्म तावत् पिशाचरूपेण स्थितं साक्षात् निजपितरं वस्त्रादिभिः परिज्ञाय पुनर्नवीभूततन्मरणदुःखः तं समुपसृत्य सविनयमेवमाचचक्षे । "सुगृहीतनामन् तात हेमललाट, लोकान्तरं गतस्य भवतः यथाविधि विहितेऽपि निखिले शवावटान्तर्निक्षेपकर्मणि, किमर्थमिदानीं मनःशान्तिमविन्दतेव भवता प्रतिदिनमेवमितस्ततोऽत्र राजसदनवेदिकायामर्धरात्रे पिशाचरूपेण संचर्यते ? । आज्ञापय कृपया यदि यत्किंचिदस्ति मे करणीयशेषं कृतेन येन भवतः तृप्तिः चित्तशान्तिश्च भविष्यति । जीवितव्ययेनापि तत् तथैव कर्तुं बद्धपरिकरोऽस्मि" इति। एवमभिहिते, स पिशाचश्च, "त्वयि वक्तव्यं किंचिदस्त्येव ; तच्च विजने कथनीयं; तदितः किंचिद्दूरं गच्छावः ।" इति तूष्णीमंगुलिसंज्ञयैव तमाजुहाव । कुमारहेमललाटोऽपि तदभिप्रा-

यानुरोधेन यावत् तमनुसर्तुं प्रायतत; तावत् तस्य प्रियसुहृत् घोरास्यः मर्षशीलश्च सहसा हस्ते तमवलंब्य प्रोचतुः। "भद्र, कुमारहेमल्लाट, नोचितमिदानीं ते पिशाचवचसि श्रद्धाय तमेवमनुसर्तुम्। कदाचिदेष दुष्टाशयो भूत्वा, त्वां प्रलोभ्य विविधैः विप्रलंभवचनैः, सुदूरमपनीय, स्वीकृतभीषणवेषः त्वां भीषयित्वा अत्युन्नतशिखरिशिखरमारोप्य पातयिष्यति; नदीयसि समुद्रे वा प्रक्षेप्स्यति। तस्मात् मा त्वमेकाकी तमनुगमः।" इति तं नितरां न्यरुन्धाम्। अपरिहार्यवीर्यधैर्यः स धरणीरमणसूनुः अनादृत्य तयोर्वचनं, "यद्येष मे एकान्तविध्वंसिनो भौतिकस्य देहस्य नाशं विधास्यति, तर्हि अनश्वरस्य मे आत्मनः का हानिः? तत् सर्वथाहमेनमनुसृत्य श्रोष्यामि तस्मात् श्रोतव्यम्!" इत्युक्त्वा तयोर्दृढतरग्रहात् बलादात्मानमुन्मोच्य, द्रुततरगत्या धावन्तं तमेव पिशाचमनुससार। तदनु पिशाचोऽपि किंचिद्दूरं गत्वा विजने तमित्थमभिधत्ते स्म। "आयुष्मन्, कुमारहेमल्लाट, नाहमन्यः कश्चिदहितकारी दुष्टाशयः पिशाचः यस्त्वां सुदूरमपनीय विप्रलभ्य विनाशयेत्। सत्यमहं ते जनयिता देन्यमारकाधीश्वरः पिशाचभावमापन्नः हेमल्लाटः। मयि यथाचारमेकदापराह्णे गृहारामे निद्रासुखमनुभवति, राज्याशापिशाचिकाग्रस्तचेताः मे सोदरः तत्र निभृतमागत्य कांचित् विषवल्लरीं निष्पीड्य तद्रसं मत्कर्णाभ्यन्तरे न्यषिंचत्, येनाखिलेषु मम गात्रेषु प्रसरता समस्तोऽपि रक्ताशयः तत्क्षणं संस्तंभितरुधिरप्रसरणो बभूव।

क्षणाच्चाहं नीतः पंचताम् । एवं निद्रापरवशस्य ज्येष्ठभ्रातुर्मम प्राणान् दारान् राज्यं च युगपदाच्छिन्दतः सोदररूपस्य वैरिणो वैरनिर्यातनमविधाय कदापि न मे शान्तिर्भविष्यति । तत् यदि त्व मम सत्यः पुत्रः, यदि च ते पितृभक्तिः, तर्हि अहमादिशामि त्वां यया कयापि विधया जहि तं मे भ्रातृगंधिनं परमद्वेषिणम् ।" इत्युक्त्वा स पुनरेवं सविषादमवादीत् । "वत्स, हेमललाट, पश्य ते जनन्याः निरनुक्रोशतामविनीततां च, या दारुण गरलप्रयोगेण मारिते मयि निजप्राणवल्लभे, मामद्वयाभ्यन्तरे एव स्वीचकार न केवलं दिधिषूभावं; किन्तु जग्राह पाणिमपि तस्य यस्यैव पाणिनाहं विषं प्रयुज्य व्यापादितः । तथापि पुत्रक, पितृव्ये इव तस्यां मा कुरु किंचित् साहसम् । त्यक्तधर्मा सा ह्यनार्यचर्या कालक्रमेण पश्चात्तापसंतापितस्वान्तरंगा निजदुर्नयोचितं नियतमनुभविष्यति फलम् ।" इत्युक्ते, कुमारहेमललाटोऽपि कृतांजलिः सविनयमेवं प्रतिजज्ञे ।। "देवभूयंगताः भोस्तातपादाः, सर्वं वः शासननवश्यमक्षरशः अनुतिष्ठामि । स्वस्थचित्तैः भवद्भिः भूयताम् ।" इत्याकर्ण्य स पिशाचः सन्तुष्टमनास्तत्क्षणमनक्षिगोचरो बभूव । अनन्तरं हेमललाटः प्रतिनिवृत्य घोरास्यमर्षशीलयोर्निकटमासाद्य पिशाचरूपस्य निजपितुः सर्वं तमुदन्तमावेद्य, "युवाभ्यां एतत् रहस्यमतिप्रयत्नेन गोपनीयं ।" इति तावादिश्य विसृज्य च स्वनिलयं गत्वा निद्रया रात्रिशेषं गमयितुं स्वकीयं शयनीयमसेवत । किन्तु चिन्ताव्याकुलीकृतचित्तत्वादना-

त्वादनासादितनिद्र एव मनस्येवमकरोत् ।

"इदानीं मे पितृव्यः, 'मयानुष्ठितस्य निजपितृमारणस्य वास्तविकं कारणं नाद्यापि मे भ्रातृव्यः हेमललाटो जानाति ; मत्कथितं सर्पदंशनरूपं कृतकं कारणमेव परमार्थतो गृह्णाति ;' इति मन्यते । तद्यद्यहं मत्पितृहननसमुद्भूतं विषादं रोषं वैरं वा मुखरागविकारादिना प्रकटयेयं, तदा मामप्ययमवश्यं मत्पितृगतां गतिमेव गमयिष्यति । तथा सति वैरानृण्यकरणस्य, पितृवाक्यपरिपालनस्य च अवकाशो न स्यात् । तस्मादितः प्रभृति मया कृतकवातुलत्वमुररीकर्तव्यम् । येन सः 'उन्मत्तोऽयमेवं असंबद्धं प्रलपति ;' इति अपगतसर्वशंकः मयि औदास्यमवलंबेत । ततोऽवसरे प्राप्ते मयापि सुखेन कृतं स्यात् वैरनिर्यातनम् । " एवं संप्रधार्य, तद्दिनादारभ्य प्रतिदिनं भिन्नभिन्नवसनानि वसानः, दधानः शरीरेषु भिन्नभिन्नभूषणानि, प्रलपंश्चासकृदसंबद्धमनर्थकं च वचनजालं, कदाचित् गायन्, कदाचित् रुदन्, कदाचित् हसन्, क्वचित् नृत्यन्, क्वचित् धावन्, कुत्रचित् निश्चलास्तिष्ठन्-शिरोधार्यं पादे पादधार्यं शिरसि च धारयन्, आनियतवेलं, अ, नियतक्रमं अनियतमात्रं च कुर्वन् अभ्यवहारक्रियां, एवं सः सर्वप्रकारैरपि उन्मत्तभावमशेषेणाभिनिनाय । या हीतः पूर्वं स्वानुरागस्य एकमायतनं बभूव ; साप्युत्पलाक्षी पूर्ववदिदानीं तेनानभिनन्दिता तस्योदासीनतायाः परमं भाजनमजायत । यतः पितृव्ये वैरनिर्यातनाय अवलंबितनैष्ठुर्ये तस्य चेतसि उत्पलाक्षी-

विषयकानुरागस्य कुतो भवेदणीयानप्यवकाशः ? तथापि क्वचित् क्वचित् समयेषु तां संस्मृत्य तद्विरहानलदन्दह्यमानमानसः तावत् कालं तस्यां स्वौदासीन्यं प्रति दूयमानहृदयः सद्य एव समधिकस्नेहसूचकैः स्वोन्मादवशानुसंवादिभिः अनेकविधासंबद्धचाटुवचनविन्यासैरलंकृतमनंगलेखमिमं तस्यै विससर्ज । " अयि कोकिलरुचिरगमने, हंसमंजुभाषिणि, उत्पलनासिके, बिंबलोचने, जलजरदने, कुन्दाधरे, चण्डि, प्रेयसि, उत्पलाक्षि, मा ते संप्रति भून्मय्यवज्ञानशंकाकणिकापि । यद्यपि कदाचित् दिवाकरे निशाकरबुद्धिः, तारकेषु हीरकबुद्धिः, सत्ये चासत्यबुद्धिः स्यात् ; तथापि कदापि मास्तु ते मय्यवज्ञानबुद्धिः ।"

सम्यगवगततन्मनोभावा अतिगंभीरमधुरस्वभावा उत्पलाक्ष्यपि तादृशं तस्य लेखं अनुवाच्य निजमनस्येवं चिन्तयामास । " श्रुतिमनोहारिणी वीणापि अरचिततन्त्री श्रुतिविहीना यथैव विस्वरं विरौति कर्णपरुषम् ; तथैव अत्युदारप्रकृतिः प्रकृत्या मय्यमन्दानुरागभरितहृदयोऽपीदानीं अयं अतिदुःसहदारुणपितृशोकव्यसनविध्वस्तबुद्धिरेवं नूनं असंबद्धं प्रलपति " । इत्यवधार्य निजपितृहस्ते तत्पत्रमर्पितवती । **पालननयाख्यः** सोऽपि वृद्धामात्यः तं लेखमनुवाच्य तद्गतमभिप्रायं अनुपदं राज्ञे राजमहिष्यै च निवेदयामास । लोकान्तरं गतस्य राज्ञो हेमललाटस्य पिशाचरूपेणाविर्भावं प्रति किंचिदप्यजानन्तौ तावपि तत् श्रुत्वा, " लोकातिशायिसौन्दर्यमन्दिरायमाणगात्र्याः उत्प-

लक्ष्याः विरह एव कुमारहेमललाटस्य उन्मादावस्थायाः मुख्यो हेतुः ; यद्यनयोर्विवाहः शीघ्रं निर्वर्त्येत, तर्हि सः स्वस्थचित्तः प्रकृतिस्थो भवेत्," इति निश्चिक्यतुः ।

कुमारहेमललाटस्तु स्वपितृपिशाचदर्शनादारभ्य तमेवानुक्षणं चिन्तयन् तन्मनोरथपरिपूरणे सततं निहितमतिः तत्र विषये क्षणकालविलंबनमपि महान्तं पापहेतुं मन्यमानः सन्ततमनेकरक्षिजनपरिवारितस्य राज्ञः पितृव्यस्य हननकर्मणि समुचितं समयमलभमानः सः मानवतामग्रेसरः भूयोऽपि एवं चिन्तयितुमारेभे । "इदानीमपि नास्ति मे पिशाचवचसि विश्वासः । श्रूयते किल पिशाचाः कामरूपिणः तत्तदभिमतरूपेणागत्य कपटवचनैर्नरान् वञ्चयित्वा अतिमहत् पापकर्माचरितुं प्रेरयन्ति इति । तस्मिन् दिने दृष्टः सोऽयं पिशाचोऽपि एतादृशेष्वेकतमो वा उत परमार्थतो मत्पिता वेति कथं शक्यते निश्चेतुम् । विनापराधं वृथैव प्राणिहिंसनं केवलं रौरवादिनिरयहेतुः । तत्रापि पितृव्यस्य मम जनन्याः द्वितीयभर्तुः राज्ञः विशसनं महते पापाय अपयशसे अश्रेयसे च स्यात् । तत् विनास्य दोषप्रत्यायकं प्रबलतरं कारणान्तरं एतन्मारणमनुचितम् ।" इति अवधार्य प्रबलतरकारणान्तरगवेषणे धृतमतिः बभूव ।

एतस्मिन्नेव समये तत् पुरमाययुः भरतशास्त्रपारदृश्वानः तत्तद्रसाभिनयचातुरीविशेषेण अभूतार्थमपि वस्तु भूतार्थमिव द-

र्शयितुं समर्थाः गाननर्तनकर्मसु प्रवीणाः सर्वत्र प्रख्यातयशसः विशेषतः कुमारहेमललाटस्य परिचितपूर्वाः केचिन्नटधुरीणाः। तान् रहसि यथार्हं समान्य हेमललाटः कतिपयाप्तजनैः परिवृतः, इतः पूर्वमेकदा स्वसमक्षं तैर्नाटकरूपेण दर्शितं करुणरसप्रधानं अतिविचित्रं किंचन पुरावृत्तं वृत्तं पुनरपि गूढं प्रयोक्तुमादिदेश । तदनु तच्छासनानुरोधं तैर्नटैः प्रस्तुत च रूपके, तत्रातिरौद्रकर्मणा शत्रुणा त्रायपुरदाहनं, सकलपौरजननाशनं, वृद्धस्य राज्ञः प्रयमनाम्नो मारणं, अनाथायास्तन्महिष्याः हेयगुप्तायाः एकाकिन्याः कंबलमात्रपरिधानायाः अनावृतपादशिरस्कं ससंभ्रमं भयतरलतारं ज्वलनपरीतात् अन्तःपुरात् पलायनं च तत्तद्रसानुगुणभाषावेषाभिनयैरनुप्रयुक्तं प्रत्यक्षवत् प्रत्यक्षीकुर्वत्सु सकलसामाजिकेषु वज्रमयहृदयस्यापि हृदयं तत्क्षणं तप्ताङ्गारनिचयमध्यनिपतितं नवनीतपिण्डमिव द्रवीभूतम् । एवमत्यद्भुततममेतेषां प्रयोगमखिलं निपुणं निरीक्ष्य विस्मयाक्रान्तहृदयः स हेमललाटः एवमचिन्तयत् । “अहो निपुणता नाट्यवेदिनामेतेषाम् । यदेते कल्पितमपि चरितं तत्तद्रसाभिव्यंजकैरभिनयैः साक्षादिव पुरतो वर्तमानं दर्शयन्ति । यदीमे काल्पनिकस्य करुणरसप्रायस्य वस्तुनः प्रयोगेणैव सामाजिकान् अश्रुपरिप्लुतनयनान् गद्गदस्वरांश्च कर्तुं प्रभवन्ति ; तर्हि किमुत परमार्थतः प्रवृत्तस्य करुणमयस्य वृत्तस्य प्रयोगेण ? तदहमेतान् सविशेषदानमानादिना संभाव्य मज्जननीसमेतस्य पितृव्यस्याग्रे मत्पितृहननप्रकारसंवा-

दि करुणरसप्रधानं किंचिद्रूपकं प्रयोजयिष्यामि । यद्ययं मत्पितृव्यः सत्यमेव मम पितुः मारकः तदा एतत्प्रयोगदर्शनकाले नियतं पश्चात्तापाभिभूतस्वान्तः विवर्णवदनः प्रयोगशेषदर्शने निरौत्सुक्यश्च भविष्यति । यतः बहुशो दृष्टचर एव नाटकदर्शनकाले सापराधानां पुरुषाणां एवंविधः चित्तविकारः ।"

इति निश्चित्य अपरेद्युस्तानाहूय विशेषवस्त्रालंकारैः सन्तोष्य तेभ्यः स्वाभिप्रायं च निवेद्य तद्रात्रावेवातिशोकरसभूयिष्ठं तादृशं रूपकं प्रयोक्तुमादिदेश। अथ संमिलितेषु अखिलेषु सामाजिकेषु, कुमारहेमललाटेन सविनयं सनिर्बन्धं च निमन्त्रितः कलाधिकः तस्य कपटप्रबन्धमजानानो महिषीसखः सपरिजनश्च निश्शंकं तत्रागत्य अग्रासनमलंचकार । प्रयोगदर्शनावसरे तन्मुखरागादिविक्रियाः निपुणं निरूपयितुकामः कुमारहेमललाटोऽपि तत्समीपवर्तिनि आसन एव उपविवेश । अथ सर्वेषु सामाजिकेषु यथार्हमासनपरिग्रहं कृतवत्सु, तेऽपि कुशीलवधौरेयाः यथाचारं प्रथमं नृत्तगीतवाद्यपुरस्सरं नाटकस्य पूर्वांगभूतं नान्दीप्ररोचनादिकं निर्वर्त्य ततः **गुणश्लाघ्यमारणं** नाम करुणरसावसायि किंचिदपूर्वमत्यद्भुततमं नाटकमेवं प्रस्तोतुमुपचक्रमिरे ।

(ततः प्रविशति एकान्तशयनस्थः **गुणश्लाघ्यो** नाम **वियाना**नगरस्य राजा **भावप्रतिष्ठया** निजदेव्या सह ।)

भावप्रतिष्ठा—(अकाण्डे सुप्तोत्थितं किंचिदिव विषण्णवदनं भर्तारं आलोक्य ।) आर्यपुत्र, यामावशिष्टायामपि यामिन्यां किमेव-

मकाण्डे निद्राभङ्गः ? तरुणतरणिकिरणप्रसरणप्रबुद्धमुग्धपुण्डरीकमिव सदैव प्रसन्नं ते मुखारविन्दं इदानीं कुतः प्रभातचन्द्रमण्डलमिव विगतशोभं लक्ष्यते ? अपि ते संप्रति शरीरे मनसि वा किंचिदस्वास्थ्यम् ?

राजा—प्रिये, भावप्रतिष्ठे, मोत्सुका भव। न खल्वहमस्वस्थः शरीरे मनसि वा । अपि तु अद्य रात्रौ मम मरणसूचकं कंचित् दुस्स्वप्नं दृष्टवानस्मि। यदि तथा मम किंचिदनिष्टं संभवति, तदा कथं स्यात् वत्सः कुमारगुणश्लाघ्यः मयि तथानुरक्ता भवती च, इति विचिन्त्य किंचिदिव मे वदनं दीनमभवत्।

देवी—(सहर्षं स्वगतम् ।) चिरात् परिवर्द्धितः मम मनोरथपादपः इदानीं संजातकुसुम इव । अपि नाम फलमपि शीघ्रं दर्शयिष्यति ? (प्रकाशं ।) शान्तं पापं ! शान्तं पापं ! (इति कर्णौ पिधाय । भर्तारं कण्ठे आश्लिष्यन्ती ।) आर्यपुत्र, यदि भवतः किंचिदनिष्टं संभविष्यति ; तर्हि विद्धि मामपि त्वामनुमृताम् । क्षणमात्रमपि आर्यपुत्रवियोगजं दुःखं नाहं सोढुमुत्सहे । वत्सः कुमारगुणश्लाघ्यः पुनः मम देवरेण लसन्नासेन आश्वासितः निजपितृसिंहासनमधिरोप्स्यते ।

राजा—न शोभनं मन्त्रितं भवत्या। विवेकहीनाचरणं खलु यदेतदनुमरणं नाम । मृतभर्तृकाया अपि पुरुषान्तरमनिच्छन्त्याः साधुपथे वर्तमानायाः कुलनार्याः अननुमरणेन नाशतोऽपि

पातिव्रत्यहानिः । तस्मात् मा कार्षीत् साहसं भवती यदि भवति मे विपत्तिः ।

देवी—प्रियवल्लभ, प्रसीद ; मा भवानस्मिन् विषये प्रतिकूलो भूत् । धिक् ता नारीः याः किल मृतेऽपि भर्तरि निजजीविते स्पृहां कुर्वते । अथ या नार्यः भर्तुः मृतेरनन्तरं अन्यं पतिमीप्सन्ति ; ताः नूनं नारीरूपा राक्षस्यः ।

(अत्रान्तरे नेपथ्ये मुरजध्वनिः ।)

राजा—(आकर्ण्य) देवि, वन्दिनां मङ्गलमुरजध्वनिरिव श्रूयते । तत् प्रभातप्राया रजनी । एहि गच्छावः ।

(इति निष्क्रान्तौ ।)

(ततः प्रविशति लसन्नासः राज्ञो यवीयान् सोदरः ।)

लसन्नासः—(स्वगतम्) प्रेरितोऽस्मि मय्यनुरक्तहृदयया मम ज्येष्ठभ्रातृभार्यया देव्या **भावप्रतिष्ठया** यत् "अद्य मध्याह्ने केलीकानने सुखेन निद्रामनुभवन्तं मम पतिं निष्पदशब्दं गत्वा कर्णयोर्विषवल्लरीरसं निषिच्य व्यापादय। ततस्त्वं सुखेन निहतकण्टकं राज्यं अवाप्य मया सह यथेच्छं रतिसुखमनुभविष्यसि" इति । अहं च त्रिभुवनललामभूतायामस्यां **वियानाराज्ये** च सततं जातस्पृहो वर्ते ।(इति चिन्तयन्नेव कतिचित् पदानि गत्वा ।) इदं तत् केलीकाननं, यत्र मम ज्यायान् मध्याह्नतरणिकिरणसन्तप्तः स्वापसुखमनुभवति। (सर्वतो दृष्टिं प्रसार्य ।) शून्यमेतदुपवनं;

तन्नास्ति कोऽप्यन्तरायः मदभिलषितकार्यसंपादने । (इति निःश-ब्दमुपसृत्य निद्रानिमीलितलोचनस्य भ्रातुः कर्णे विषवल्लरीरसं निषिंचति ।)

इति अतिकरुणमभिनीयमानं एतावन्तं कथांशमपि निरीक्ष्य स्वविहितेन भ्रातृहननेन सुसंवादितया अस्य प्रयोगस्य पश्चात्ता-पाभिभूतान्तरङ्गः कलाधिकः विवर्णवदनः अस्वस्थहृदय शेषम-पि कथांशवर्णनं निरीक्षितुमशक्नुवन् निरुत्सुकः शिरःशूलव्या-जेन सहसा उत्थाय जगाम निजशयनगृहम् । राज्ञी गर्वरूढा च निजहृदयारुन्तुदं एनं प्रयोगं निरीक्ष्य नितरां जातोद्वेगा प्रयोगशेषदर्शने वीतस्पृहा मिषेण केनचित् झडित्युत्थाय निज-निलयं ययौ । तयोरुभयोर्झडिति निर्गमनात् तावता कथांशेना-वसितः स रूपकविशेषः । अनन्तरं नाटकस्योपक्रमादारभ्य तयोः गर्वरूढाकलाधिकयोः तत्तत्सन्दर्भेषु समुद्भूतां मुखरागादिविक्रि-यां निपुणतरं निरूपयन् स्थितः कुमारहेमललाटः विशेषतः गुण-श्लाघ्यस्य विषदानप्रकरणवर्णनावसरे तयोस्संजातं अत्यन्तानुश-यसूचकं चित्तोद्वेगं, अनवसितेऽपि नाटके तयोस्सहसापसरणं च निरीक्ष्य पितृव्यकृतं निजपितृमारणं प्रति सम्यक् संजातप्र-त्ययः प्रियवयस्यं घोरास्यं आलोक्य, "सखे, अपि सम्यक् निरूपिता भवता नाटकप्रयोगावसरे अनयोर्मम जननीपितृव्य-योः अनुशयसूचिका आकारविकृतिः मनोरुजा च ? इतः पूर्वं मम पितुः प्रेतिकस्य वचसि आसीदेव किंचिदविश्वासः । इदानीमे-तन्नाटकदर्शनसमये तयोर्मुखवैवर्ण्यादिकं स्पष्टं दृष्टवतो मे तदेव

पिशाचवचनं अनर्घमणिगणपूर्णस्य महतो निधेर्लाभादपि अतिरिच्यते ।" इत्येवं कथयतस्तस्य कश्चित् दूतस्तत्रागत्य, "भर्तृदारक, विजने किंचित् विवक्षुः देवी कुमारमाकारयति ।" इति आचख्यौ । सोऽपि जननीवचनमनुरुध्यमानः तस्याः अन्तःपुरं प्रविश्य, तत्र समन्ततो यवनिकाच्छन्ने कस्मिंश्चित् विविक्ते मन्दिरैकदेशे निरीक्षितनिजागमनां मातरमद्राक्षीत् ।

आगतं पुत्रमवलोक्य साऽपि रहस्येवमभिदधे । "अयि, पुत्रक, मूढमते, किमेवमकार्यमनुष्ठितं त्वया निजपितरं राजानं मां च नाटकदर्शनव्याजेनाहूय आवयोर्महान्तं मनःखेदमुत्पादितवता ? अनेन ते अविनयेन अतितरां क्रुद्धेन तव पित्रा इदानीमहमेवमादिष्टास्मि । "दुष्टमतिनास्मत्पुत्रेण बह्वपराद्धं मयि ; यदेष मूर्खः राजानमपि मां किंचिदप्यगणयित्वा नाटकापदेशेन मम दोषमुद्घाट्य नितरां मम हृदयव्यथामतानीत् । यदीतः परं मन्मनःपीडावहमीदृशमनार्यचरितमाचरिष्यति ; तन्नियतमहमेनमतितीव्रेण दण्डेन योजयिष्यामि," इति । तत्, पुत्रक, किमेवं भवज्जननीपतिमत एव भवत्पितरं देन्यमारकदेशाधीश्वरं तमीदृशैर्दुष्टचरितैः प्रकोपयसि ?" इति निष्ठुरवचनैः निरभर्त्सयत् ।

एतदाकर्ण्य कर्णकठोरं निजजननीभाषितं आज्यसिक्त इव होमाग्निः द्विगुणीकृतकोपकृशानुः सुधीरं तामेवमभिधत्ते स्म । "अयि, अनार्यशीले, पतिघातिनि, पतिघातकप्रिये, त्वामिदानी-

मतिपावनेनाम्बाशब्देनामन्त्रयितुमपि न मे जिह्वा प्रवर्तते । 'पितरि किमेवं त्वयापराद्धं ?' इति मां पृच्छसि । कोऽस्ति मे सांप्रतं पिता ? मत्पितृव्येन दारुणं मारितश्चिरात् स लोकान्तरं गतः तपस्वी । राज्यलोभात् यः निद्रापरतन्त्रं मज्जनयितारं स्वज्येष्ठभ्रातरं चोराधम इव गूढं गरलप्रयोगेण व्यापाद्य तत्पत्न्यास्तल्पमपि दूषयति ; स मानुषराक्षसः कथं मे जनको भवितुमर्हति ? नूनमभाजनमेष नृशंसः प्रजावतीजारः अतिपवित्रस्य पितेति शब्दस्य। प्रियानुरक्तं मत्पितरं व्यापाद्य तादृशमत्पितृघातिना सह संगतया त्वयैवानार्यया मत्पितरि बह्वपराद्धम् । " इति दुर्वारकोपपरिस्खलदक्षरं तद्वचनमाकर्ण्य सा गर्धरूढा पुनरपि तं प्रतिबभाषे। "यदि त्वमेवं पुत्रवात्सल्यात् उक्तं मद्वचनं नांगीकरोषि तर्हि एषा गच्छामि प्रेषयामि च त्वदनुशासनाय तमेव राजानं यस्य वचनात् त्वं स्वां प्रकृतिं प्रतिपत्स्यसे ।" इत्युक्त्वा गन्तुमारब्धां तां कुमारहेमललाटोऽपि दृढावलंबिततत्करः यावत् रुरोध ; तावत् उन्मत्ततामिभूतः सन्नद्धशस्त्रः एषः कदाचित् मम शरीरे अनिष्टमाचरिष्यति इति भीतभीता सा, 'परित्रायध्वम् ! परित्रायध्वं !' इति उच्चैश्चुक्रोश । अत्रान्तरे कुमारहेमललाटमनुशासितुं स्वपत्नीं गर्धरूढामादिष्टवता कलाधिकेन, 'पुत्रगर्धिनी इयं सर्वं स्वतनयोक्तं अशेषतः नास्मन्निकटे प्रकटीकरिष्यति,' इति मत्वा तस्याः गमनसमनन्तरमेव स्वविस्रम्भभाजनं प्रधानामात्यः पालननयः " अविदितं तत्पृष्ठतो गत्वा तिरस्करिण्याः

बहिः स्थित एव सर्वं तस्योत्तरमाकर्णय, " इति प्रेषयामासे । कलाधिकेन इत्थं प्रहितः तथैव यवनिकासमीपे अन्तर्हितः तयोः सल्लापं निभृतं शृण्वन् स्थितः सोऽपि वृद्धामात्यः राज्ञ्याः आर्तनादमाकर्ण्य, " न भेतव्यं न भेतव्यं ; अयमहमागतोऽस्मि " इत्युक्त्वा सत्वरं यावत् तिरस्करिणीमाक्षिप्य अन्तः प्रवेष्टुं प्रायतत ; तावत् कुमारहेमललाटः तं निजपितृव्यमेव मन्यमानः सद्यः एव तं शितधारेण निजनिस्त्रिंशेन निर्भिन्नहृदयं विगतजीवितं च विदधे । तथा निहतं तं प्रधानसचिवं परिज्ञाय मन्युशोकपरीता गर्धरूढा तनयमालोक्य, " अरे, दुर्दान्त, भ्रान्तचेतन, कथमेवं त्वं नो वृद्धामात्यं आर्यपालननयं व्यापाद्यातिनृशंसं कर्माचरितवान् ?" इति पप्रच्छ । सोऽपि तामित्थं प्रत्युवाच । " अम्ब, नैतन्मदनुष्ठितं कर्म त्वदाचरितान्नृशंसतरम् । यतः कामपरतन्त्रहृदयायाः तव प्रेरणया न केवलमनुरक्तः पतिः व्यापादितः अपि तु तादृशपतिघातुकः निजदेवर एव पतित्वेनांगीकृतः । इदानीमेकस्यास्तवानार्यकर्मणा लोके सर्वा अपि साधुचरिताः कुलनार्यः शंकास्पदं जाताः । अनेन चातिगर्ह्येण तव पुनर्विवाहेन लोके यथाविधि विहितः सर्वोऽपि विवाहः पांचालिका परिणयः इव नितरां परिहसनीयः संजातः । " इत्येतादृशैरन्यैश्च अतिनिष्ठुरवचनजालैरतितरां तां निर्भर्त्सयामास । ततश्च तत्रैव भित्तिपार्श्वे अवलंबिते पितुः पितृव्यस्य च प्रतिकृती निजजनन्यै संदर्श्य, " अयि मातः, निरूप्यतां अनयोरालेख्ययोस्ता-

रतम्यम् । पश्य मे जननि, पितुः निसर्गमधुरोदाराभिमामाकृतिं, सन्ततदयापरिप्लुतं नयनयुगं, मन्दस्मितसुधाधवलितमधरपुटं, आजानुलंबि बाहुयुगलं, वीरलक्ष्मीविहारसदनमिव स्थितं अत्युन्नतं विशालं उरःप्रदेशं च । निरीक्ष्यतां चायमन्तककिंकराकारो मत्पितृव्यहतकः ते द्वितीयदयितः ; यः वक्रनासः, मार्जारनयनः, उन्नतदन्तः, लंबोदरः, कर्कशकायश्च सन् दृष्टमात्रेण निजवपुषा भयममन्दं जनयति जनानाम् । कथं त्वमेवमतिमधुरमाकृत्या प्रकृत्या च ते प्रथमं भर्तारं मत्पितरमपहृतजीवितं विधाय अतिदुर्दर्शने अस्मिन् पुरुषाधमे मम पितृव्ये अनुरक्तचेताः जातासि ?" इति पुनः पुनस्तां निनिन्द ।

यद्यपि पूजनीयेषु मातापित्रादिषु गुरुजनेषु पुत्रादिभिरेवं दोषनिरूपणं निर्भर्त्सनं च नितरामनुचितं ; तथापि, कार्याकार्यमजानतां उत्पथं प्रतिपन्नानां गुरूणामपि शासनं भृशमुपपन्नमेव । तथा चोक्तम् ।

"गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ॥" इति

एवं कथयतस्तस्य, इतः पूर्वं निशीथे दृष्टः तस्य पितुः पिशाचः भूयोऽपि तत्र प्रादुर्बभूव । तं दृष्ट्वा चकितहृदयः कुमारहेमललाटः "भोः पितः, किमर्थमत्र ते भूयोऽपि प्रादुर्भावः ?"

इति तमनुयुयुजे । सोऽपि तच्छ्रुत्वा, "वत्स, कदाचित् त्वं मच्छासनं विस्मरिष्यसि इति मत्वा पुनरपि तदेव स्मारयितुं अहं ते नयनसरणिमवतीर्णोऽस्मि ।" इत्युक्त्वा झडिति अन्तरधात् । पुत्रमन्तरा तत्र किमपि पुरुषान्तरमपश्यन्ती गर्धरूडा तमवलोक्य, "पुत्रक, किं नाद्यापि जानासि यदेतत् ते आकाशभाषितमेव व्यक्तं व्यक्तीकरोति तवोन्मत्तभावमिति ?" इति श्रुत्वा स प्रतिव्याजहार । "अयि, स्वदुष्कृत्यानभिज्ञे, मातः, न त्वमुन्मत्तप्रलपितापदेशेन मद्वचनमनादृत्य मत्तः स्वानुष्ठितं दुश्चेष्टितं निह्नोतुं प्रभविष्यसि । क्रियतामद्य भवत्या मत्करे धातुपरीक्षा येन ज्ञास्यसि यदेतन्मे आकाशभाषितं वास्तविकं उत वातुलताप्रयुक्तं वेति । तन्मे जननि, इतः परमयशस्करस्य त्वदनुष्ठितस्य चेष्टितस्यांशतोऽपि गोपनमतिदुष्करं स्यात् । तत् प्रकाशमभ्युपगम्यतां एतत्ते दुष्कर्म । मज्जनकमारणविषये सानुतापा सन्ततं तत्स्मरणेन दर्शय तस्मिन् ते भक्तिम् । इतः पर मा भज ते पतिघातिनं तं पितृव्यं पतित्वेन । यदि त्वमित्थं कुरुषे तर्हि पतिघ्नीदोषादात्मानमुन्मोच्य ममापि सत्या जननी भविष्यसि ।" इति विनयावनतशीर्षं अश्रुपरिप्लुतनयनं च अभ्यर्थयमाने तस्मिन्, निसर्गनिष्ठुरहृदयापि तस्य निर्बन्धमसहमाना सा गर्धरूडा, "अयि पुत्रक, तथैव सर्वं त्वदनुशिष्टं करिष्यामि," इत्युक्त्वा सत्वरं तं विससर्ज । तदनु स्वसदनं प्रतिनिवर्तमानः कुमारहेमलटोऽपि स्वेन अज्ञानादनुष्ठितं निजप्रे-

यस्याः उत्पलाक्ष्याः पितुः पालननयस्य व्यापादनमनुचिन्त्य नितरां दूयमानमानसः तद्विषये स्वासमीक्ष्यकारितां विनिन्दन्नेव स्वनिलयमुपययौ ।

अत्रान्तरे कलाधिकः कुमारहेमललाटेन विहितं प्रधानामात्य-हननं श्रुत्वा प्रकुपितः तन्मिषेण निजानर्थहेतुं तं तत्क्षणमेव हन्तु-कामोऽपि तस्मिन् पौराणामतिभूमिं गतमनुरागं निजदयितायाः गर्भरूढायाः वात्सल्यातिरेकं च विदित्वा तथा कर्तुं अशक्नुवन्, "कृतापराधस्य अस्य पुरादपसारणं कंचित् कालं देशान्तरे वर्तनं च तच्छ्रेयसे स्यात्" इति तस्य हितचिकीर्षयेव सद्यस्तं राजभट-युगलानुगतं नौकामार्गेण स्वसामन्तनृपपालितां आंग्लभूमिमेव प्राहिणोत् । तत्प्रयाणसमये च, "अस्माभिरिदानीं भवत्सविधं प्रहीयमाणः अखिलजनतानर्थहेतुः उन्मादाक्रान्तः अयं बालः भवता निश्शंकं सद्य एव च्छिन्नशीर्षः क्रियताम्," इति अंग्लधराधीशाय पत्रमेकं विलिख्य, "एषः लेखः युवाभ्यां अंग्लमहीनाथस्य हस्ते निगूढं दीयताम्" इत्युक्त्वा तत्पत्रं निभृतं राजभटयोर्हस्ते नि-क्षिप्तवान् । कुमारहेमललाटोऽपि मध्येमार्गं निद्रापरवशहृदययो-स्तयोः कंचुकात् तत् पत्रं गृहीत्वा अनुवाच्य च अवगततत्वः तत्रस्थं स्वनामधेयमपमृज्य तत्स्थाने तयोः राजभटयोर्नामनी निवेश्य यथापूर्वं तां पत्रिकां तत्कंचुके निचिक्षेप । एतैरधिरूढा नौश्च त्वरितगतिः समुद्रमार्गेण यावच्चचाल ; तावत् सा मध्ये-

समुद्रं नौकान्तरमास्थितैः समुद्रदस्युभिर्बलादवस्कन्दिताभूत् । तदनु उभयोः सैन्ययोः प्रवृत्ते महति संग्रामे, संयुगप्रियः निसर्गशूरः धीरधीः हेमललाटः कृष्टासिः झडिति चोरसैन्याधिष्ठितायां नौकायामेकाकी निपत्य तैस्सह सुधीरं युयुधे । अत्रान्तरे अतिभीरुप्रकृतिकौ तौ राजभटावपि एवमतिधीरं चोरनावि प्रविश्य युध्यमानमेकाकिनं तं विसृज्य स्वप्राणसंत्राणनैकबद्धहृदयौ चोरैः वियुक्तं स्वयानपात्रमतिवेगेनांगलभुवं प्रति प्रेरयामासतुः । आसाद्य चांगलधरणीपतिं यावत् तद्धस्ते कलाधिकप्रेषितं पत्रमार्पयतां तावत् अनुवाचितपत्रेण तेनतत्क्षणं तौ छिन्नशिरोधरौ अन्तकपुरनवातिथी चक्राते ।

धीरधीरं युध्यमानं एकाकिनं राजपुत्रमवलोक्य, निसर्गेण हिंसारुचयोऽपि ते समुद्रचोराः तत्पराक्रमप्रक्रमप्रगुणीकृतविस्मयाः स्ववशवर्तिनमपि तं अहिंसितमेव दैन्यमारकदेशसमीपवर्तिनि कस्मिश्चित् नौकोत्तरणस्थाने विसृज्य यथाभिप्रेतं देशं जग्मुः । हेमललाटोऽपि तस्मात् स्थानादेव कांचित् पत्रिकां विलिख्य, मध्येजलनिधि समुद्रचोरैराक्रमणं, तैस्सह एकाकिनस्स्वस्याभियोगं, तत्समये आत्मानं विसृज्यांगलभुवं प्रति राजभटयोर्गमनं, स्वपराक्रमातिसंतुष्टहृदयैश्चोरैरात्मनस्तत्र विसर्जनं च तत्र पत्रे सविस्तरं प्रदर्श्य कलाधिकाय प्रेषयामास । परेद्यवि च निजपितृव्यनिकटं प्रति जिगमिषया राजमार्गेण यावदागच्छत् ;

तावत् तस्य मनःशल्यकरः कोऽप्यचिन्तितपूर्वः व्यतिकरः नयनगोचरः संवृत्तः । स च यथा—

यदनुरागवशीकृतचित्तायमेवान्वहमनुचिन्त्य विरहानलसंतप्तहृदया सन्ततमताम्यदुत्पलाक्षी ; तेनैव निजहृदयवल्लभेन हेमललाटेन निर्दयं व्यापादितं निजपितरमाकर्ण्य सा नितान्तशोकशंकुकीलितहृदया उन्मत्तवत् उद्भ्रान्तचेतना, रुदती गायन्ती नृत्यन्ती च इतस्ततः परिभ्रमन्ती मल्लिकाचंपकपारिजातादिकुसुमैर्विरचितां मालामेकां करे धारयन्ती कस्याश्चित् क्षुद्रतटिन्यास्तटभुवि प्ररूढस्य तरोः शाखाग्रमारुह्य परेतस्य पितुः पूजाचिकीर्षया यावत् तां मालां तरुविटपे अवलंबयति स्म ; तावत् तद्भारभग्नेन विटपिविटपेन सह अनवबुद्धात्मनाशा अविरतकृतमंजुगानमुखरमुखकमला अगाधे तस्याः स्रोतोवहायाः स्रोतसि पतिता निजपितृगतामेव गतिमनुगतवती । तदनु लयरतिनामा तस्याः अनुरक्तो भ्राता तन्नाशात् अमन्ददुःखाक्रान्तहृदयः तत्प्रेतकृत्याचिकीर्षया तस्याः शवं शवयानमारोप्य अखिलैरपि बन्धुजनैः राज्ञा राजमहिष्या राजपरिजनैश्च अनुगम्यमानः राजमार्गेण परेतभूमिं प्रति गच्छन्नासीत् । एतदवलोक्य हेमललाटोऽपि "कस्येयं महती प्रेतयात्रा ?" इति तद्दर्शनकौतुकाविष्टधीः नातिदूरस्थ एव स्वयमपि तं जनमनुससार । अनन्तरं च लयरतादयः उत्पलाक्ष्याः बन्धुनिवहाः शवनिक्षेपस्थानमासाद्य क्षितितलमुत्खाय शवावटे तस्याः प्रेतं निचि-

क्षिपुः । तदनु यथाकुलाचारं सर्वा अपि तत्रागता अंगनाः अंजलिपूर्णैः कुसुमैस्तच्छवमवाकिरन् । तस्मिन् समये राज्ञी गर्भरूढापि स्वांजलिपूर्णं कुसुममादाय अश्रुपूर्णनयनयुगला उत्पलाक्षीशवमुपसृत्य, “अयि, ललनामतल्लिके, वत्से उत्पलाक्षि, मया खलु चिरादाशंसितं यत् त्वं वत्सस्य मे हेमललाटस्य प्रियसहधर्मिणी भविष्यसीति । सोऽयं मम आशातन्तुः अपगतदयेन दुष्टदैवेन अकाण्डे मूलतः खण्डितः । तदेभिः प्रसूनैः कर्तव्ये सति तव नववधूशयनगृहप्रसाधनकर्मणि, मन्दभाग्यया मयेदानीं तव शवगृहमलंक्रियते ।” इति मुक्तकण्ठं रुदती तच्छवोपरि पुष्पाणि प्राक्षिपत् । अनुपदमेव लयरतिश्च निजसोदरीविश्लेषदुःखमसहमानः शोकोन्मादाभिभूतमानसः तामनुमुमूर्षुः तच्छवोपरि निपत्य निजपरिजनानवलोक्य, “सेवकाः, अनेन सह मम सोदरीशरीरेण मामपि निखनत ।” इति उच्चैः चुक्रोश ।

एतत् सर्वं निभृतं निपुणं च निरूपयन् अदूरे स्थितः हेमललाटोऽपि निजदयितायाः दारुणमरणश्रवणव्रणितश्रवणयुगलः निर्भरशोकोन्मेषप्रमुषितनिजधिषणः तत्क्षणं जवेन तत्र गत्वा तच्छवोपरि निपत्य निस्संज्ञः क्षणं तिष्ठन् तदनु लब्धसंज्ञः एवमतिकरुणं बहुधा प्रलपितुमारेभे । “अयि हृदयदयिते, उत्पलनयने, उत्पलाक्षि, कथमकाण्ड एव एवंविधां दशां नीतासि ? त्वयि सोदरसहस्रस्नेहादप्यधिकं स्नेहमुद्वहदिदं मे मानसं ननु

मसहं त्वत्सहजस्यास्य लयरतेस्त्वय्येतादृशोऽनुरागस्य ।” इति एवं बहुविधं विलपति हेमललाटे, निजभगिनीजनयित्रोर्निधननिदानीभूतस्यास्य संदर्शनमात्रेणातिमात्रप्रवृद्धमन्युः नरशार्दूलो लयरतिः शार्दूल इव गजरिपुयुवानं युवानं तं निरर्गलं गले जग्राह । तदनु तयोरेवं प्रवृत्ते परस्परं वैरानुबद्धे नियुद्धे, मध्यस्थैस्तत्रस्थैः संभूय प्रतिबोध्य विहितसन्धी तौ द्वावपि धीरौ वीरवरौ शान्तवैरौ तत्कालं स्वस्वबन्धुभिः सह स्वं स्वं आलयं प्रति चेलतुः ।

तदनु हेमललाटव्यापादनसंपादने सततबद्धदीक्षः रूक्षधीः कलाधिकः तद्धननार्थं पूर्वं स्वप्रयुक्तमुपायं सापायं समवलोक्य मनसि संजातामन्दखेदः स्वेष्टसाधने भेदमेव एकं साधनं मन्यमानः मानातीताभिमानमाहितमतिं लयरतिमतिनिगूढमाहूय, “ त्वत्सोदरीपितृनिधनकारिणं वैरिणमेनं हेमललाटं शस्त्राशस्त्रिक्रीडामिषेणासाद्य तीव्रविषदिग्धेन निशितधारेण निस्त्रिंशेन व्यापाद्य संपादय वैरनिर्यातनेन निजपितुः प्रीतेरानृण्यम्,” इति भृशमुत्तेजयामास । तद्वचनानुरोधेन लयरतिरपि हेमललाटनिकटमासाद्य, “ भद्र हेमललाट, कृतकनिस्त्रिंशक्रीडया आवयोः बलाबलपरीक्षणं करणीयमिति चिरान्मेऽस्ति भूयानभिसन्धिः । कथं तत् भवते रोचते ?” इति सस्नेहमिव तमन्वयुङ्क्त । त्रिंशतोऽपि निस्त्रिंशधरान् वीरानेकाकी युगपदसियुद्धे पराभवितुं प्रभविष्णुः हेमललाटः सानन्दमंगीचकार तदभ्यर्थनाम् ।

अथ एतयोः कृतकशस्त्रक्रीडार्थं निर्दिष्टे दिवसे, व्यायामशालायां तद्दिदृक्षया संघशः संमिलितेषु सस्त्रीबालेषु सर्वेषु पौरमुख्येषु, समागते सविशेषकौतुकं सावरोधजने सपरिजने च राजनि कलाधिके, प्रख्यातपराक्रमयोः तयोः परस्परजयमधिकृत्य तत्तत्पक्षपातिभिः सुहृद्भिरैः संस्थापिते च महामूल्ये पणे, लयरतिहेमललाटयोः सवीरवादमजनि कृत्रिमसौजन्यमूलोऽयं महान् क्रीडाशस्त्रसंप्रहारः। तस्मिन्नवसरे लयरतेः कपटं मनागप्यजानानः हेमललाटः कृतकशस्त्रक्रीडाविध्यनुसारेण कुण्ठितधारं कृत्रिमखड्गमेकं पाणौ जग्राह। निजवैरिविलयविहितरतिः लयरतिस्तु अतिक्रम्य तादृशान् विधीन् विषदिग्धं निशितधारं निस्त्रिंशं अन्यैरविदितं करे धृतवान्। अत्रान्तरे परवञ्चनकलानिपुणः कलाधिकः, " कार्येषु सततमप्रमत्तः मत्तमातंगपोतसदृशः अयं मे भ्रातृव्यहतकः यदि कदाचित् लयरतेः प्रमादवशात् न व्यापाद्यते, तर्हि शस्त्रक्रीडाश्रमजनितपिपासानिवारणकरणव्याजेनात्र सज्जीकृतस्य कठोरगरलमिश्रितस्यास्य मधुरमधुरसस्य पानेन वास्य मरणमवश्यं भवतु, " इति सज्जीकृततादृशपानविशेषः एतत्कपटवैदेशिक्या स्वमहिष्या सह सहर्षं तन्मिथ्याशस्त्रयुद्धमनक्षिकंपं प्रेक्षमाणः तस्थौ। ततो लयरतिश्च कंचित् कालं यथाविधि कृतकखड्गाखड्गियुद्धं विधाय लघुलघून् कांश्चन तस्य कृतकखड्गप्रहारान् मर्षयित्वा आत्मनः उपरि पराक्रमितुं च तस्य क्षणमवकाशं ददौ। तदा आसन्ननिषण्णः कलाधिकोऽपि

" साधु ! हे पुत्रक हेमललाट साधु ! " इति तत्पराक्रमणसन्दर्शनसञ्जनितामन्दानन्दः इव सश्लाघं तं प्रोत्साहयामास । मनागपि तत्कपटमनाशंकमानः मानिनां पुरोगः हेमललाटः तद्वाक्यं यथार्थमेव मन्यमानः यथापूर्वमसिक्रीडां कर्तुमारेभे । कृत्रिमशस्त्राशास्त्रिर्लीलालोल इव तद्विधानक्रमेण कंचित् कालं युध्यमानः लयरतिस्तु क्रमेण संजातसंरंभः अतिवेगेनाभिधावन् तीक्ष्णविषदिग्धधाराधारिणा तरवारिणा दारुणं मरणावहं व्रणं तच्छरीरे उत्पादयामास । तादृशखड्गप्रहारप्रवृद्धक्रोधः हेमललाटः तदानीमपि तत्कपटमजानन् निरर्गलगलद्रुधिरधारं असिक्षतमप्यगणयन् कृतशस्त्रविनिमयः तेनैव गरलदिग्धशस्त्रेण प्रहरन् लयरतिं लयरतिमेव कारयामास । अत्रान्तरे निजतनयविक्रमप्रक्रममतिकुतूहलेनावलोकयन्ती राज्ञः कलाधिकस्य निकटनिषण्णा गर्धरूढा पिपासार्दिता सती, हेमललाटहननार्थं राज्ञा तत्र सज्जीकृतं सगरलं मधुरसं अशेषमज्ञानादास्वाद्य सद्यः सकलशरीरव्यापृतविषवेगा, " हा हतास्मि विषप्रयोगेण, " इति तारस्वरेण क्रोशन्ती सपदि गतासुः क्षितितले निपपात । निजजननीनिधनदर्शनमात्रेण अतिमात्रप्रवृद्धमन्युशोकः हेमललाटः किंचित् कपटमाशंकमानः तत्क्षणं तत्परीक्षणार्थं यावत् खुरलीकेलिशालाद्वारपिधानाय भृत्यान् समादिदेश ; तावत् दृढशस्त्रप्रहारप्रसरदस्रधाराप्लावितसर्वगात्रः क्षितितले विलुठन् आसन्नमरणः लयरतिः संजातानुतापः तमेवमभिधत्ते स्म । " भद्र, हेमललाट,

अलं परीक्षणेन। त्वत्पितृव्यगंधिनो दुष्टमतेरस्य कलाधिकस्य प्रेरणया अहमेव भवज्जिघांसया गरलाक्ततीक्ष्णासिलतया विक्षतगात्रं त्वां अकरवम् । भूयो भवन्नाशाय मयैव गरलदूषितं मधुरमद्यमप्यत्र सज्जीकृतम् । तदज्ञानादास्वाद्य मृता ते जननी । विषादिग्धशस्त्रक्षतगात्रस्त्वमपि न मुहूर्तमपि जीविष्यसि । तत् प्रसीद ; क्षमस्व मे सर्वमेतत् त्वयि दुरनुष्ठितम् ।" इत्युक्त्वा जीवितं तत्याज । तदनु हेमललाटः अत्यासन्नं निजमरणं विज्ञाय संस्मृत्य च पाकशासनपुरनवातिथेः निजपितुः शासनं आसनस्थं निजपितृव्यमभिधाव्य तस्य हृदये सुदूरं निचखान तामेव निजकरस्थां विषमविषदूषितामसिलतां ; तत्क्षणमनयच्च तं कृतान्तनिशान्तं ; एवं अन्ते अपूरयच्च निजजनयितृमनोरथम् । अनन्तरं च विषवेगविकलीकृतशक्तिः शक्तिमतामग्रणीः स हेमललाटः निश्चेष्टः पपात धरणीतले । व्यतिकरमिमं सर्वमादितः प्रभृति अवलोकयन् स्थितः शोरास्यो नाम तत्प्रियवयस्यः तादृगवस्थामापन्नं निजसुहृदमवधार्य तद्विश्लेषमसहमानस्तेन सह लोकान्तरं जिगमिषुः निजशिरःकर्तनार्थं यावत् जग्राह कृपाणं निजपाणौ, तावत् कण्ठगतप्राणोऽपि हेमललाटः प्राणमित्रं तमेवमनुशशास । "मित्रमणे, मा त्वमाचर मदर्थमात्मघातरूपं इदं साहसम् । यदि सत्या ते मयि इयं मैत्री तर्हि उररीकुरु मन्नियोगात् आधिपत्यं मामकीनस्य राज्यस्य; सर्वत्र प्रकाशय च इदं मत्पितृव्यस्य सर्वं दुश्चेष्टितम् ।" इत्युक्त्वा, उपलभ्य च तत्र विषये तदभ्युपगमं,

झडिति जीवलोकं जहौ । तदनन्तरं घोरास्योऽपि सुहृन्मरणजं विषादं कथंकथमपि सहमानः मृतानां त्रयाणामपि तेषां यथार्हं निर्वर्त्य प्रेतकृत्यं प्रकाश्य च सर्वत्र कलाधिकस्य गर्हणीयं कृत्यं, राजभक्तिभरितैः प्रकृतिमुख्यैः संभूय हेमललाटप्रतिनिधित्वेन हेममये सिंहासने निवेश्य यथाविधि अभिषिक्तः धर्मेण शशास वसुधातलम् ।

ERRATA IN HAMLET.

Page	Line	For	Read
1	5	अन्यसक्तः	अन्यसक्तः।
,,	6	परितुप्यति	परितुष्यति
,,	7	ता	तां
,,	9	विभव	विभवं
,,	10	देशरत्नम	देशरत्नम्
,,	20	पृष्टारो	पृष्टारो-
2	10	तत्प्रार्थनां।	तत्प्रार्थनां ;
,,	11	आनन्दयामास;	आनन्दयामास।
4	13	अस्मर्तपतेति	अस्मत्पितेति
7	2	घोराम्यः	घोरास्यः
,,	5	वचनः	वचनैः
,,	19	निप्पीड्य	निष्पीड्य
8	4	त्व	त्वं
,,	21	चित्तत्वादना-	चित्त-
9	15	तिष्ठन् -	तिष्ठन्
,,	16	अ,	अ-
12	6	तच्छासनानुरोधं	तच्छासनानुरोधेन
13	6	ते	ते-
14	17	अधिरोप्स्यते	अधिरोप्यते or अधिरोपिष्यते
18	15	उन्मत्तता	"उन्मत्तता
,,	16	आचरिष्यति	आचरिष्यति,"
19	13	व्यापदितः	व्यापादितः
,,	17	पांचालिका परिणयः	पाञ्चालिकापरिणयः
23	9	तेनतत्क्षणं	तेन तत्क्षणं
24	3	चित्तायमेव	चित्ता यमेव
,,	14	अमन्ददुः	अमन्ददुः -
25	20	ननू -	नून-

NAMES OF CHARACTERS etc., OCCURRING IN THIS TALE.

एतत्कथास्थानां पात्रादीनां नामानि ॥

MALES.	**पुरुषाः**
1. Capulets.	कापिलाः
2. Mountagues.	मातंगाः
3. Benvolio.	वेणुवलयः
4. Romeo.	रम्यकः
5. Mercutio.	मेरुकूटः
6. Tybalt.	तीव्रबलः
7. Lawrence.	लालनरसः
8. Paris.	परेशः
FEMALES.	**स्त्रियः**
1. Rosaline.	रसालिनी
2. Juliet.	जलजाक्षी
PLACES.	**स्थानानि**
1. Verona.	वीररणा
2. Mantua.	मानतत्वं

॥ श्रीरस्तु ॥

ROMEO AND JULIET.

जलजाक्षीरम्यकयोः कथा ।

" अनातुरोत्कण्ठितयोः प्रसिध्यता
समागमेनापि रतिर्न मां प्रति ।
परस्परप्राप्तिनिराशयोर्वरं
शरीरनाशोऽपि समानुरागयोः " ॥

(*Málavikágnimitra.*)

अस्ति समस्तनिस्तुलरत्नादिवस्तुजातप्रस्तुतरत्नाकरमाहात्म्या, अखिलमहीमण्डलमण्डनायमाना, अनवरतसंचरच्चटुलचाटुपटुविविधविलासिनीजनविलसितवीथिमार्गा, निजसम्पत्समृद्ध्यातिशायितधनपतिविभवधनिकगृहसहस्रसंकुला, सन्ततसंरक्षणदक्षराक्षिजननिवहरक्ष्यमाणराजमार्गा, वीररणा नाम नगरी । तस्यां च दिवाकरनिशाकरसंभवे इव रघुकुलनिमिकुले, कपिलमतङ्गसम्भूते द्वे एव क्षत्रियमहाकुले अतिप्रसिद्धतमे धनधान्यसमृद्धिसंपन्ने

चास्ताम् । परं तु, मार्जारमूषिकाणामिव, नकुलसर्पाणामिव, सिंहगजानामिव काकगृध्राणामिव चोभयोरप्येनयोः कुतोऽपि कारणाच्चिरकालादारभ्य सम्भूतं, आलर्कं विषमिव दिनेदिने प्रवर्धमानं दुस्समाधेयमतिमहद्वैरम् । तच्च तथा प्रवृद्धं यथा यत्र-कुत्रापि विपणिमार्गे यदृच्छया नयनगोचरीभूतेऽपि यस्मिन् कस्मिंश्चित्कापिले, तत्सम्बन्धिनि, तत्सेवके वा, तद्वैरिणो यस्य कस्यापि मातङ्गस्य, तत्सम्बन्धिनः, तत्सेवकस्य वा, तत्रैव सद्यः समभूदाज्यसिक्तस्येव होमाग्नेर्महानमर्षः, तत्प्रसक्तश्चोभयोरन्यतरस्य वा प्राणक्षयकरः कलहः । किं बहुना । एतैः कापिल-मातङ्गैः प्रतिक्षणं प्रवर्तितैः परस्परकलहैरेव, निरुपप्लवमपि कृत्स्नं तद्वीररणराज्यं शश्वत्समजनि सर्वत्र समाकुलीकृतम् ।

एवं गच्छति काले, मातङ्गकुलमहत्तरस्य तनयः सकलकलासु चतुरः स्वावयवसौन्दर्यविराचितकन्दर्पदर्पभङ्गः, विविधायुध-विद्याविशारदः, शारद इव चन्द्रः सुहृद्वर्गस्य ततान नेत्रमनः-प्रीतिं सर्वत्र गीतयशाः **रम्यको** नाम यथार्थनामा क्षत्रयुवा । स च प्रथमे वयसि वर्तमानामतिरूपलावण्यवतीं **रसालिनीं** नाम काञ्चन प्रभुवरकन्यकां चकमे ; चाटूक्तिशतजटिलाभिर्दूती-हस्तप्रेषिताभिः सन्देशपत्रिकाभिश्च तां भार्यात्वेन स्वीकर्तुं प्रायतत । अनल्पावलेपभरभरिता, अतिरोषणस्वभावा, अज्ञातप्रणय-धर्ममर्मा, सा तु तन्वङ्गी अनङ्गीकृततदभ्यर्थना, गुणज्ञमपि तं

सावज्ञं धिक्चकार । तथापि रम्यकस्तदासक्तचेताः रात्रिन्दिवं तद्विरहानलसन्दह्यमानगात्रः स्नानाशनादिक्रियास्वपि मन्दीकृतादरः, क्षामक्षामशरीरस्समजनि । तदवस्थं च तमालोक्य लोकव्यवहाराभिज्ञो **वेणुवलयो** नाम तत्प्रियसुहृदेवमाचष्टे स्म । "प्रियवयस्य रम्यक, अवगतनिखिलनीतितत्वोऽप्यनङ्गीकृताभ्यर्थनामकृतानुरागामतिवामशीलां तामेव वामां कामयमानो भवान् किमेवं वृथा खेदयति न केवलमात्मानमपि तु भवदायत्तजीवितान् पित्रादीन् बन्धुवर्गान् अस्मादृशांश्च सुहृद्वर्गान् ? सन्ति खलु सहस्रशः वीररणायां सदृशविभवानुरागाः कन्यकाः, याः किल निजवपुर्महिम्ना कुसुमायुधकुटुम्बिनीमप्यतिशेरते । तद्दूरीकुरु मद्वचनं ; दूरीकुरुष्व च तद्गतमनुरागम् ।" इत्येतैरन्यैश्च विविधनीतिवचनजातैरनुशिष्टोऽपि दिष्टदोषादिष्टवचनेऽप्यकृतादरो नष्टचेताः कष्टमेवानुभवन्नास्त । इत्थं चलति च काले, कदाचिद्वृद्धकापिलस्य मन्दिरे प्रावर्तत कश्चन महान् कौमुदीमहोत्सवः । तत्र मतङ्गकुलवर्जं सर्वेऽपि सम्पन्ना नागराः सस्त्रीबालाः समाहूताः । तदा धृतविविधविशेषवस्त्राभरणाः स्वरूपापहसितरातिविभ्रमाः सविभ्रमाः सुभ्रुवः सर्वा अपि समुज्ज्वलनैपथ्यपुनरुक्तगात्रशोभाः ससखीजनास्तत्र सन्निदधिरे । रम्यकस्य स्नेहैकभाजनमपि तस्मिन्निस्स्नेहा रसालिनी नाम ललनामतल्लिकापि तत्र जगाम । चिरमवसरापेक्षी सकलसद्गुणगणनिलयो वेणुवलयस्तदा, "अयमेव साधीयानवसरः सवयसं रसालिन्यां

विमुखीकर्तुं " इति सम्यगवधार्य निजमनसि, सानुनयं तमेवम-वादीत् । " प्रियवयस्य, श्रूयतेऽद्य रजन्यामस्मत्कुलवैरिणो वृद्धकापिलस्य मन्दिरे महान् चन्द्रिकामहोत्सवः प्रवर्तत इति ; तत्र चाद्यैवैतन्नगरनिवासिनस्सर्वेऽपि सम्पन्नास्सञ्चलन्ति ललनामणयश्च । तव नेत्रसुधावर्ती रसालिन्यप्यवश्यं तत्र गमिष्यति । 'सन्ति किल सहस्रशोऽधरीकृतरसालिन्यः कुलकन्यकामणयः ' इति मुहुर्मुहुर्मयोक्तेऽपि न भवतः प्रत्ययस्सञ्जातः । तदयमेवावसरस्ते मद्वचनस्य याथार्थ्यं परीक्षितुम् । एहि गच्छावश्छन्नवेषावावामस्मन्निसर्गवैरिणोऽपि तस्य वृद्धकापिलस्य सदनम् । "

इत्याकर्ण्य तद्वचसि वीतप्रत्ययोऽपि रम्यको रसालिनीदर्शनोत्कण्ठालुण्ठितमानसस्तेन सह तत्र गन्तुमनुमेने । ततो द्वावपि तौ निजवयस्येन मेरुकूटेन सह वर्णिकापरिग्रहणेन निजरूपं गोपयित्वा रजनीमुखे तत्रैव प्रचलद्भिरन्यैर्नागरैस्समं कापिलप्रभुवरसदनमासेदतुः । विविधविशालवाजिशालासमुल्लासिते, निर्मलहेममयभित्तिभक्तिविराजिते, विचित्रस्फटिकशिलास्तम्भसहस्रसंकुले, अतिमृदुलविचित्रकुथास्तरणास्तृतभूमिपृष्ठे, अतिसुरभिचन्दनागरुसंधूपितान्तर्भागे, अनेकनटनर्तकगायकबृन्दनन्दिते, ढक्कावेणुमृदङ्गकाहलपटहवीणादिवादनमोदितमनुजवृन्दे तस्मिन्मन्दिरवरे, इतरैर्नागरैस्समं ते त्रयोऽपि वृद्धकापिलमहत्तरेण सावनयं सोपचारं सानन्दञ्चाभिनन्दिताः, सविशेषभक्ष्य-

भोज्यवस्तुजातैश्चन्दनताम्बूलकुसुमादिभिः सुधारससदृशरसवत्कदलीद्राक्षारसालपनसादिफलवर्गैः सुवस्त्राभरणैश्च यथेच्छं सत्कृता निर्भरानन्दतुन्दिलस्वान्तास्सन्तस्तत्रागताः अतिसुन्दरगात्रीर्वीणावेणुमृदङ्गादिवाद्यवादनतत्पराः, नृत्तगीतविनोदनदत्तादराः सर्वा अपि नगरपुरन्ध्रीः सादरं वीक्षमाणास्तद्गीतिश्रवणप्रवणीकृतचेतसः सञ्जातहर्षरोमाञ्चप्रपञ्चकञ्चुकितगात्राः स्वर्गसुखमिव क्षणमनुबभूवुः। ततश्च रम्यकस्तत्रस्थास्सर्वा अपि रसालिनीप्रभृतीः कन्यकाः एकैकशो निरूप्य, स्वसमीपे ललितललितं नृत्यन्तीमत्युदारोज्ज्वलरूपामभिनवयौवनविजृम्भणावलसितगात्रयष्टिमनङ्गशृङ्गारमङ्गलगृहं निजानुरागातिशयव्यञ्जकमञ्जुलकटाक्षवीक्षणैरसकृदात्मानमभिनयव्याजेन विलोकयन्तीं, करतलकलितवीणारवानुबद्धमुग्धकाकलीसंकलितगीतिविशेषामनङ्गसुन्दरीमिव क्षितितलमलंकुर्वाणाङ्काञ्चन कमललोचनामतिचिरन्निर्वर्ण्य, तस्यां प्ररूढगाढानुरागाङ्कुरः, हंसीगणमध्यवर्तिनीङ्काकीमिव रसालिनीम्मन्यमानस्तुल्यानुरागपिशुनैरक्षिविक्षेपैरिङ्गितज्ञान्तामेव विस्मृतनिमेषं वीक्षमाणस्तत्कालजनितप्रमदभरवशाद्वैरिसदनवर्तिनमप्यात्मानं विस्मृत्यार्यामेनामपठत्।

"तडिदिव घनमध्यस्था, खद्योतालीवृतेव दीपशिखा।

काकीगणमध्यगता हंसीवाभाति कामिनी सेयम्॥"

एवं तामुपश्लोकयति रम्यके, तत्रालक्षितोपस्थितः वृद्धकापिलस्य सोदर्यतनयः निसर्गरोषणः अविनयसूतिकालयस्तीव्रबलो नाम वीरयुवा तदाकर्ण्य स्वरसंयोगेन सम्यग्विज्ञायाभ्यर्णगतं रम्यकं दुस्सहामर्षकषायितेक्षणः प्रस्फुरिताधरकिसलयः, पृथुलतरललाटतटघटितविकटभ्रुकुटिर्दन्तान् कटकटापयन् सावज्ञमित्थमाचचक्षे ।

"रे जाल्म, मातङ्गकुलकलङ्काङ्कुर, अस्मत्कुलशत्रो, मनुजापशद, कथमेवमतिगरिष्ठया धृष्टतया दूषयसि वेषपरिवर्तनं विधाय मङ्गलमहोत्सवाभिराममस्मन्मन्दिराभ्यन्तरममङ्गलेनैतेन तवानाहूतप्रवेशेन ? कथं वा वितथीकरोष्यतिथिगणाराधनजन्यमानन्दं ? अद्य मद्धस्तगतः कथं मोक्ष्यसे ? त्वामहमधुना पशुमारं मारयामि ।"

इत्युक्त्वा विजृम्भितसंरम्भः कोशात् खड्गमाकृष्य तत्रैव तं छिन्नशीर्षं विधातुं प्रावर्तत ।

शस्त्रविद्याविशारदो धीरधीः रम्यकः कृष्टासिरतिलाघवेन तं निरुन्धन् सावज्ञमिदमाबभाषे । "अपेहि रे गेहेनर्दिन्, कातर्यकुलभवन, किमेवं व्यर्थविकत्थनैरात्मनः शक्तिराहित्यं प्रकटीकुरुषे ? निसर्गभीरवस्सुभ्रुव इति कृत्वा तत्समक्षं शीर्षच्छेद्यमपि न त्वां व्यापादयामि । नाहमात्मम्भरित्वेन प्रेरितोऽत्राया-

सिषम् । अपि त्वेकत्र मिलिताशेषललनामणिगणदिदृक्षया अनिष्टमप्येतद्वेषपरिवर्तनं विधायात्रागतवानस्मि ” । इत्युक्त्वा प्रत्यक्षीकृतनिजविक्रमप्रक्रमद्विगुणीकृतवात्सल्यां तामेव वामनयनां साचीविलोकितेनानुक्षणं वीक्षमाणस्तस्थौ ।

अत्रान्तरे वृद्धकापिलः सत्वरं तत्राभ्येत्य, भ्रातृव्यबद्धकलहं भ्रातृव्यमालोक्य सानुनयमिदमवोचत् । “ तात तीव्रबल, न युक्तं ते मङ्गलमहोत्सवे वैरिणमप्यस्मद्गृहातिथीभूतमेनमधुनाऽभिभवितुम् । अपरं, शत्रुकुलोत्पन्नोऽप्येष महानुभावः सकलसद्गुणसम्पन्नः सर्वत्र सङ्गीयते साधुचरित्र इति । तस्माद्विरम विरमास्मात्संरंभसन्धुक्षितात्कलहारंभात् ।” एवं वादिनि तस्मिन्, निजपितृव्य वचनयन्त्रितस्तद्गौरवात्कलहादुपरम्य “अरे मातङ्गाधम, यद्यप्यधुनास्मत्तातपादवचनेन प्राणनाशात्परिरक्षितस्तथापि, यदाकदा वावसरे प्राप्ते, अस्याविनयस्य सदृशं फलमवश्यमनुभविष्यसि ” । इत्युक्त्वा कोशान्तर्निक्षिप्तखड्गलतस्सद्यस्तस्मात्प्रदेशादन्यत्र चचाल ।

अनन्तरमवसिते च नृत्तगीते, सखीजनसमीपात्किञ्चिदपसृत्यैकान्ते तिष्ठन्तीमीषच्छ्रमजलकणिकाचुम्बितकपोलतलकान्तिपरिभूतमुकुरबिम्बां तां बिम्बाधरामुपसृत्य रम्यकस्स्मितपूर्वामिदमूचे । “ सुन्दरि, सुचिरकालनर्तनान्नवकिसलयगर्भसोदरं ते चरणनलिनयुगलमतिविपुलनितम्बबिम्बभारवहनविधुरं विशेषतस्ताम्यति;

शिरीषकुसुमसुकुमारञ्च ते करतलयुगं वीणावादनजनितव्रणारुणिताङ्गुलि दृश्यते। तदिह भवत्या किंचिदुपविश्य विश्रम्यताम्"।

इत्याकर्ण्य प्रणयभरपरिप्लुतं तद्वचनं, किञ्चिल्लज्जावनतवदनकमला, समन्दहासा साप्यवादीत् ॥ "महाभाग, नितरां सम्भावितास्मि भवतोऽनया मय्यनुकम्पया। प्रथमन्तावदभिवन्दस्व स्वेष्टदेवतां यत्प्रसादात्त्रिभुवनललामभूतमिदं ते वपुरधुना प्रवृत्ते कलहे प्राणसंशयात्परित्रातम्।" एवमभिहिते, सोऽपि, "ननु ममेष्टदेवतात्रैव मूर्तिमती मत्पुरतः प्रकाशते ; तदेनामभिवन्दे" इति यावत्तच्चरणौ ग्रहीतुं प्रायतत, तावत्तस्यास्सखीष्वेकतमा तत्रागत्य, "सखि, जलजाक्षि, सुचिरमत्रावस्थितासि ; अन्तःपुरं गन्तुमाकारयति त्वामम्बा। तदेहि गच्छावः।" इत्याहूता साप्यसकृद्वलितकन्धरा, अमन्दानुरागपिशुनेनापाङ्गविलोकितेन तमेव सस्नेहं पश्यन्ती सदनाभ्यन्तरमयासीत्।

तदनु, रम्यकश्च तत्सखीमुखात् तां कापिलकुलपतेरेकपुत्रीं समस्तस्यापि तद्वित्तजातस्य पूर्णांशहारिणीमित्यवगम्य, निजनिसर्गवैरितनयात्वादुपेक्षणीयामपि स्वच्छन्दप्रवृत्तानिरुपाधिकस्नेहवशीकृतस्वान्तः, क्षणमपि तां विहातुमशक्नुवन् ययाकयापि विधया तामेव परिणेतुं निरचैषीत्।

नास्वस्थशरीरा भविष्यसि ।" इत्युक्त्वा तां शयनगृहगमनाय नितरां निर्बबन्ध ।

तदनु जलजाक्ष्यपि रम्यकं विसर्जयितुमपारयन्ती पुनः पुनर्व्याजेन प्रतिनिवृत्य प्रणयमांसलैः कैश्चन वचनपीयूषैर्निजविरहविह्वलं तं प्रत्युज्जीव्य कथंचित् तमापृच्छय विसृज्य च निजशयनसदनं भेजे । ततस्तददर्शनखिन्नमानसो रम्यकश्च कथंकथमपि तस्मात्स्थानादपक्रम्य जलजाक्षीपाणिग्रहणोपायासक्तचेताः निजवसतिमप्यगत्वा सद्य एव तन्नगरोपान्तकान्तारमध्यवर्तिनः कात्यायनीमन्दिरस्य नातिदूरे कृतवसतिं अनल्पसौहार्दसार्द्रहृदयं लालनरसं नाम परिचितपूर्वमन्यादृशबुद्धिवैभवं वृद्धसन्यासिनमुपगम्य, साष्टाङ्गपातं प्रणनाम । सोऽपि योगीश्वरः कृतप्रणामस्य तस्य विहिताशीः सादरमेनमारात्समुपवेश्य वक्तुमारेभे ।

"वत्स रम्यक, अपि कुशलं? किमद्य ते प्रत्यूषसमय एव मदाश्रमं प्रत्यागमनस्य कारणम्? किमिति ते वदनाम्बुजं निद्राभावकलुषीकृतनयनयुगलं लक्ष्यते? अनेकशो मया बोधितोऽपि तामेव वामशीलां रसालिनीं कामयमानः एवं विगतनिद्रो वृथा परितप्यसे । जहीहि संप्रति तद्गतां चिन्तां; परिगृहाण चान्यामनुरूपां कामपि कुलवधूम् ।"

श्रुत्वैवैतद्वचनमतिहृष्टमानसो रम्यकस्तं प्रत्यूचे । "भगवन्नाश्रितवत्सल, नाहं कुटिलस्वभावां रसालिनीं स्वप्नेऽपि चिन्तयामि । अपि तु, कपिलकुलमहत्तरस्य कन्यका जलजाक्षी नाम तरुणीमणिरिदानीं मत्स्नेहस्यैकायनीभूता । तस्या अपि मयि महाननुरागः । तद्यथाद्यैव समानुरागयोरावयोः पाणिपीडनविधिर्निर्वर्त्येत तथा विधातुमर्हति भवान् । क्षणमात्रमपि विलम्बं सोढुमक्षमोऽहम् । यदि भवांस्तथा कर्तुं कृपां न करोति, तर्हि भवत्पादमूल एव मत्प्राणान् परित्यजामि ।" इत्याकर्ण्य योगीश्वरोऽपि मनस्येवमचिन्तयत् "नूनमनुरूपास्य सा जलजाक्षी । अपरमनयोर्विवाहेनैव शान्तिमेष्यत्यनादिकालादुद्भूतं अज्ञातकारणं कापिलमातङ्गकुलयोरतिमहद्वैरम् । तदस्मिन् कार्ये उभयकुलसुहृदा मया धृतकाषायवाससापि निपुणं निसृष्टार्थदूतीधुरमङ्गीकृत्यावश्यं प्रयत्नः कार्यः लोकद्वयश्रेयोलाभाय ।" इत्येवमवधार्य लालनरसो योगिवर्यस्तत्प्रभात एव तयोर्विवाहविधिं गूढं निर्वर्तयितुमनुमेने ।

अनुपदमेव स मस्करी जलजाक्षीप्रेषितदूतीमुखेनैव तां विदितवृत्तान्तां कारयित्वा निजाश्रमस्य नातिदूरवर्तिनि भवानीमन्दिरे देव्यभिवन्दनव्याजेन सखीद्वितीयामानाय्य रम्यकस्य प्रियसुहृद्भ्यां मेरुकूटवेणुवलयाभ्यां संभृतसर्वसंभारः देव्याः पुर एव जलजाक्षीरम्यकयोः पाणिग्रहणमङ्गलं यथाविधि निगूढं निर्वर्तयामास ।

निर्वृत्ते च परिणये, जलजाक्ष्यपि निजदयितमालोक्य, "प्राणवल्लभ, अद्य प्रभृति सकलमपि मदीयं धनकनकवाहनादिवस्तुजातं त्वदायत्तीकृतं। अपि त्वयमस्मत्परिणयवृत्तान्तः कञ्चित्कालं यावद्गोपनीयः। भवता च तत्पर्यन्तं प्रतिदिनं रात्राववि-दितमागम्य मद्भवनोद्यानं वातायननिकटगतया मया सह विस्रंभालापाः कार्याः।" इति सन्दिश्य सख्या सह स्वमन्दिरं जगाम।

तदनु तस्मिन्नेव दिवसे मध्याह्ने रम्यकस्य प्रियसुहृदौ मेरुकूटवेणुवलयौ तन्नगरवीथीमार्गेण गच्छन्तावास्ताम्। तत्समये परिमितनिजकापिलसुहृद्भिरनुयातोऽतिसुलभकोपस्तीव्रबलोऽपि तेनैव मार्गेणागच्छन्निजकुलवैरिणा रम्यकेण चिरकृतप्रणयं मेरुकूटमालोक्य जातामर्षस्तमित्थमधिचिक्षेप। "रे रे मेरुकूट, धिक् त्वां पुरुषाधमं, योऽतिनिकृष्टेन मतङ्गकुलापशदेन रम्यकेण सह निर्लज्जं संसर्गं कुरुषे।" श्रुत्वैतदसह्यमत्युद्धतमसभ्यं च वचनमतिमात्रप्रवृद्धमन्युर्मेरुकूटश्च "अरे वृथाविकत्थनशील, पुरुषपशो, तीव्रबल, कस्त्वमेवमधिक्षेप्तुं निखिलगुणाकरं मम प्रियवयस्यं रम्यकं? न त्वं तस्य पादरजसापि तुल्यः," इत्यतिपरुषतरवचनैस्तं समतक्ष्णोत्। वेणुवलयकृतसान्त्ववचनमप्यनादृत्य तयोरेवमन्योन्यं कलहायमानयोः, रम्यकोऽप्यकस्मात्तं देशमाजगाम। तद्दर्शनमात्रेण द्विगुणीकृतसंरंभसंधुक्षितकोपकृशानुस्तीव्रबलस्तमुद्दिश्य "अरे दुष्टमातङ्गापशद, दिष्ट्या त्वमद्य मन्नयन-

गोचरं गतोऽसि । पूर्वेद्युः रात्रौ वीतलज्जेन त्वया विधाय वेषपरिवर्तनं अस्मत्पितृव्यमन्दिरमागत्य दूषितः खलु कौमुदीमहोत्सवः । तदनुभव सांप्रतं तस्याविनयस्य फलं ।" इति कोशात्खड्गमाकर्ष्टुं प्रायततँ ।

तदा धीरधुरन्धरोऽपि निसर्गतस्साधुचरितः स रम्यको निरर्थककलहेष्वनासक्तधीर्विशेषतश्च जलजाक्ष्यपेक्षया तेन सह व्यर्थकलहं परिजिहीर्षुस्सन् मृदुगिरा स्मितपूर्वं सादरमिदमगादीत् । "भद्र, कापिलकुलशिखामणे, तीव्रबल, न खल्वावामविदितपरस्परबाहुवीर्यौ तत्किमेवमस्थाने मह्यं वृथा कुप्यसि मां च प्रकोपयसि?" इति तीव्रबलमुद्दिश्य सानुनयमस्य वचनमसहमानः साहसैकनिधिर्मेरुकूटः स्वप्रियवयस्यं रम्यकमालोक्य "प्रियसख किमेवं वीर्यनिधिरपि त्वं निर्वीर्य इवास्मिन् कापिलहतके सानुनयगिरा व्यवहरासि? एषोऽहमधुना निशितधारयासिलतया वृन्तादिव तालफलं स्कन्धदेशादस्य शीर्षं पातयामि ।" इत्युक्त्वा तीव्रबलाभिमुखमेवाभ्यधावत् ।

अनन्तरं चानयोः प्रवृत्ते महति शस्त्राशस्त्रियुद्धे, शस्त्रविद्याकुशलोऽपि मेरुकूटः, मेरुकूट इव कुलिशेन, कूटयुद्धविशारदेन तीव्रबलेन संछिन्नशीर्षो मह्यां पपात । निकृत्तशिरसं निजप्रियवयस्यमालोक्यात्यन्तप्रवृद्धमन्यूरम्यकस्तत्क्षणं तीव्रबलमपि तं तीव्रबलं स्वखड्गेन विगतग्रीवं विदधे । तदनु तत्कोलाहलमाकर्ण्य

अथ यथायथमुच्चलिते चातिथिसार्थे, रम्यकः स्वीयवयस्याभ्यां सह प्रस्थाय किंचिदन्तरं तदनु जलजाक्षीनिरीक्षणकुतूहलाक्षिप्तचेतास्तयोरविदितमपसृत्य निशीथे तस्याः गृहाराममभित्तिमुल्लंघ्य, तत्रस्थनिबिडतरुनिकुञ्जान्तरितगात्रः, निजवल्लभानिरीक्षणापेक्षया तत्सौधगवाक्षनिक्षिप्ताक्षियुगलः सुचिरं तस्थौ । अत्रान्तरे जननीनिदेशान्निजसदनाभ्यन्तरं गता सापि जलजाक्षी तद्दर्शनादारभ्य विषमशरशरशरव्यतां गता प्रतिक्षणं तमेव चिन्तयन्ती तद्विरहानलदन्दह्यमानगात्री विगतनिद्रा, शरच्चन्द्रमरीचिचर्चिते तस्मिन्निशीथे, उत्तुङ्गसौधवातायनस्य निकटे निषेदुषी, वामकरकिसलयविन्यस्तवदनकमला, पुष्पवाटीप्रहितेक्षणा सविषादं स्वगतमिदमूचे । "भगवन् संकल्पयोने, किमेवमबलां मामसुलभजनजनितानुरागां विधाय नितरां क्लेशयसि ?" इत्यनवसितवचनायामेव तस्यां, केलिकाननपादपान्तरितगात्रः रम्यकः सौधान्तरकस्मादुद्भूतमतिमन्दमपि ध्वनिं श्रुत्वा यावद्गवाक्षमार्गे अक्षियुगलं प्राक्षिपत्, तावत्सिताभ्रचयमध्यादिवोन्मिषन्तीं तडिल्लताङ्काञ्चन स्त्रीव्यक्तिमपश्यत् । अनुपदं निपुणमवलोकयन्निजमनोवल्लभां तामेव जलजाक्षीं निजाक्षियुगलपीयूषं प्रत्यक्षीचकार ।

तदवलोकनसमनन्तरमेव हरिचन्दनलिप्तमिव, सुधाजलधिनिमग्नमिव चात्मानं मन्यमानः सावशेषं तस्या वचनामृतं पिपासुस्तत्रैव निभृतं शृण्वंस्तस्थौ ।

पुनरपि जलजाक्षी स्वगतं मन्त्रयते स्म । "अयि मम प्राण-वल्लभ, रम्यक. किन्त्वयास्मत्कुलवैरिकुले लब्धं जन्म? निराकुरु निजं कुलं पितरं मातरं च मदर्थम् । अथवाहमेव भवदर्थे परित्यजामि निजकुलं सहैव मिजप्रियबान्धवैः । अथवा शत्रुर्मित्रमित्यकिञ्चित्करमेतत् । न खलु बहिरुपाधिः प्रीतेः कारणम् । उक्तं च यतः ।

"व्यतिषजति पदार्थानान्तरः कोऽपि हेतु-
र्न खलु बहिरुपाधीन्प्रीतयस्संश्रयन्ते ।
विकसति हि पतङ्गस्योदये पुण्डरीकं
द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ”

इति स्वगतमेकाकिनीं मन्त्रयमाणामालक्ष्य रम्यकः हर्षभरनिर्भरनिजहृदयः पुष्पवाटीनिकुञ्जमध्याद्वातायनसमीपमुपसृत्य "मत्प्राणवल्लभे, सत्यमुक्तं भवत्या, यन्न खलु बहिरुपाधिः प्रीतेः कारणमिति । अहमपि त्वद्दर्शनात्प्रभृति त्वद्गुणगणापहृतमानसः क्षणमपि त्वद्विरहवेदनां सोढुमक्षमः निशीथेऽप्यद्य त्वद्दिदृक्षाभिनिविष्टचेताः अत्रायासिषम् । त्वदर्थमहं न केवलमात्मनः कुलं, पितरौ, बन्धून् वा, अपि तु जीवितमपि परित्यक्तुं बद्धपरिकरोऽस्मि । तदनुगृह्यतामेष दासजनो भवत्या" इति सविनयानुरागं सांजलिबन्धं च प्रार्थयामास ।

तदाकर्ण्य लज्जाभयतरलितहृदयापि सा जलजाक्षी अतर्कितोपनततद्दर्शनोल्लासितांतरङ्गा, पुरुषप्रवेशानर्हे, निजान्तःपुरकानने, अर्धरात्रे कापिलकुलकुलशलोस्तस्यागमनमनर्थावहमिति परिज्ञाय भीतभीता तं सादरमिदमाभिदधे ।"अयि साहसप्रिय, प्रियवल्लभ, मल्लोचनचकोरचन्द्र, यद्यद्य कपिलवंशजः यः कश्चिन्मम बन्धुस्त्वां पश्येत्, तदात्रैव स त्वामेकेनैवासिलताप्रहारेण, नामशेषं करिष्यति। तथा सति, भवद्विरहासहिष्णोर्ममापि मरणमेव शरणं स्यात्। तद्यावन्न कश्चिदत्रस्थं भवन्तं पश्येत्; तावज्झडित्यपक्रम्यतां भवता ।"

इत्यभिहिते, रम्यकोऽपि किञ्चिद्विहस्याह "अयि, मुग्धे, त्वदर्थे नाहं तथा बिभेमि कापिलानामसिलतासहस्रादपि यथाऽतितीक्ष्णाग्रेण त्वदीक्षणयुगलेन मन्मनसः प्रहर्तुर्मनासिजात्। अथवा त्वया विना मरणमपि मे वरं स्यात्।" ततः स पुनस्तया, "कथमद्यात्रागतोऽसि? कस्ते मार्गनिर्देशकः?" इति पृष्टः तां प्रत्यवादीत् "भवदनुरागसन्धुक्षितः कुसुमचाप एव ममाद्य मार्गोपदेशकः। यद्यपि नाहं नाविकः, तथापि द्वीपान्तरगतामपि सकलललनाशिरोमणिं त्वां क्षिप्रमासादयितुं, कल्लोलमालाकुलमनेकयोजनसहस्रविस्तीर्णमम्बुराशिमपि निस्तरीतुं प्रभवेयम्।" इति सम्यगाविष्कृतनिजानुरागं रम्यकं प्रणयपुरस्सरमालोक्य साभिदधे।

"मातङ्गकुलचूडामणे, प्रियवल्लभ, रम्यक, विदितमेवैतद्भवतो यदिह भुव्यनुरागविद्धचेतसोऽपि कुलकन्यकाः प्रेमभरभारितमपि युवानं न सहसांगीकुर्वन्ति। अपि तु, प्रत्याख्यानपरुषैर्वचनजालैः प्रथमं दूरीकृत्य तत्प्रार्थनां तस्मिन् सुचिरमुदासीनतामभिनीय, सम्यग्दृढीकृतनिजप्रेमबन्धाः पश्चात्तमङ्गीकुर्वते। अतिदुर्लभमपि, अनायासेन लब्धं वस्तु, अवज्ञाविषयतापापद्यते खलु। त्वयि मदनुरागस्त्विदानीमलक्षितोपस्थितेन सर्वम्मद्भाषितमाकर्णितवता भवतावगतचर एव। तन्नेहास्ति प्रत्याख्यानपरुषैर्वचनविन्यासैर्विलम्बं कर्तुं कश्चिदप्यवसरः। एतेन च मदनुरोधेन मा तव मयि लाघवशंका जायेत।" इत्यभिहिते रम्यकोऽपि, "क एष दासजनः मदनुग्रहबुद्ध्या आगतां मूर्तामिव मत्कुलदेवतां भवतीं स्वप्नेऽपि अवज्ञातुम्? यदि न ते प्रत्ययस्तर्हि त्वां शपथशतेन वीतशंकां करोमि" इति यदा शपथं कर्तुं प्रावर्तत, तदा सा जलजाक्षी प्रत्यवोचत्। "नाथ किं वृथा शपथेन? ज्ञायत एव सम्यगधुना मयि तवायं महाननुरागः। तदितः परं यथा नचिरादावयोः पाणिग्रहणमङ्गलं निर्वर्त्येत तथा निगूढं यत्नः कार्यः। अस्मद्विवाहाय संकेतं विधातुं च श्वः प्रभाते महूर्तीं भवन्निकटं प्रेषयामि।" इत्यनवसितवचस्येव तस्यां, तस्याः धात्र्यागत्य, "वत्से, जलजाक्षि, प्रभातप्रायायामपि यामिन्यां किमेवं वातायनसमीपस्था प्रवातमासेवमाना वीतनिद्रा तिष्ठसि? ननु निद्राभाव-

सर्वेऽपि तन्नगरनिवासिनः मातङ्गाः कापिलाश्च सस्त्रीबालास्तत्रा-
ययुः। तन्नगराधिपतिरप्येतद्व्यतिकरमाकर्ण्यासकृदेवं व्यर्थक-
लहैः कृत्स्नं तद्वीररणाराज्यमाकुलीकुर्वतः कापिलान्मातङ्गांश्च
स्वयं निर्भर्त्सयितुं, तत्र कलहे कृतापराधानत्युग्रेण दण्डेन यो-
जयितुं च कृतनिश्चयस्तत्रागत्य, तस्मिन्कलहे प्रत्यक्षसाक्षीभूतं
वेणुवलयं कलहकारणं वक्तुमादिदेश। स च निजसुहृदो
रम्यकस्य यद्यदतिदोषापादकं भवेत् तत्तद्यत्नेन वर्जयित्वा सर्वं
तत्र वृत्त व्यतिकरं नरपतिसमक्षं यथार्थत उपावर्णयत्।

अत्रान्तरे रम्यकेण विनिहतं निजबन्धुं तीव्रबलमालोक्य
निर्भरशोकावेगपरिप्लुता कापिलमहत्तरस्य पत्नी राजानमासाद्य
"नीतितत्त्वविशारद, भो नरपते, निरपराधस्य मद्देवृबलस्य प्रा-
णहारिणोऽस्य दुष्टमातङ्गयूनः यथार्हं दण्डमाज्ञापयितुमर्हसि"
इति नितरां निरबध्नात्। यतस्सा तपस्विनी नाज्ञासीत् स एव
रम्यकः स्वस्याः एकदुहितुः प्राणवल्लभः सर्वात्मना संरक्षणीयः
प्रेमपात्रं निजजामातेति। अथ रम्यकस्य जननी मातङ्गकुलमहत्त-
रस्य भार्यापि राजनिकटमासाद्य प्राञ्जलिस्तमेवं सविनयं प्रार्थ-
यांचक्रे।

"महाराज, धर्ममर्मज्ञ, निजप्रियसुहृद्धननसंजातसंरंभेण हि
मत्पुत्रकेणायं तीव्रबलो मारितः; न तु विना कारणम्। अपरं

च यद्यपि मेरुकूटहननादुत्तमदण्डयोग्यमेनं तीव्रबलं मत्पुत्रको नाहनिष्यत् तथापि देवस्तमवश्यं शूलमारोपयिष्यदेव । तदयमनपराधी मत्पुत्रकः स्वामिना कृपया प्राणदानेन परिरक्षणीयः" इति ।

श्रुत्वैतत्सर्वं भूपतिरपि निपुणं विचार्य कार्यतत्वं, रम्यकं सापराधं परिज्ञाय, निजबन्धोर्मेरुकूटस्य प्रियसुहृत्तया तस्य मरणदण्डं परिहृत्य, तन्नगरान्निष्कासनमाज्ञापयत् । अत्रान्तरे जलजाक्षी निजदयितेन रम्यकेण, स्वपितृव्यपुत्रस्य व्यापादनं श्रुत्वा मन्युशोकपरीतमानसा, तमेवमुपालब्धुमारेभे । "अरे, आकृत्या सुन्दर, स्वकृत्या नृशंस, वचसि मधुमय, चेतसि विषमय, कथमेवं त्वया गोरूपच्छन्नेन दुष्टमृगादेन वञ्चिताहं ? नन्वद्य परिज्ञातोऽसि दिव्यरूपान्तरितो दुष्टराक्षसस्त्वमिति ।" अथ सा किञ्चिद्विचार्य पुनरप्येवमवादीत् । "अथवा निसर्गमधुरोऽतिगंभीरस्वभावो मत्प्राणेश्वरो रम्यको विनैव महान्तं हेतुं नैतदतिनृशंसं कर्म समाचरेत् । असकृदतिशूरंमन्यः कलहप्रियश्चास्मत्पितृव्यतनयस्तीव्रबल इति विदितचरमेव । दिष्टया मम प्राणवल्लभः कुटिलमतिनानेन कलहे, न व्यापादित इति महदिदं सन्तोषस्थानं ; यतः यदि स क्रूरकर्मा, तीव्रबलहतको मत्प्रियदयितेऽशुभमाचरिष्यत् तदा किमभविष्यदेतस्या मम मन्दभाग्यायाः ? तत्सर्वथानुकंपितास्मि दीनजनैकबन्धुना भगवता विधात्रा।"

इति चिन्तयन्त्याश्च तस्या मनसि पुनरप्येवमुदभूदतिगरीयसी चिन्ता । "कथमिदानीं मया मन्दभागिन्या मरणादप्यतिदुःखकरीं दयितप्रवासवार्तां विस्मृत्यास्थानेऽतिसंतुष्टया स्थीयते? लोकान्तरगतोऽपि प्राणनाथोऽनुमरणेन मयानुगन्तुं शक्यो न तु नगराद्विवासितः । असंभाव्यपुनस्समागमप्रत्याशयोरुभयोरप्यावयोरिदमामरणवियोगजं जीवन्मरणमतीव हृदयविदारणकारणम् । सजीवे च प्रियदयिते, आत्महत्याकरणं परलोकहानये, महते अयशसे, पापाय च भवेत् । तत्किं मयाद्य विधेयम् ? "

इत्येवं चिन्तासन्तानसन्दानितान्तःकरणा रम्यकदर्शनोत्कण्ठया कृच्छ्रेण तद्दिवसमनैषीत् । जलजाक्षीरम्यकयोस्तादृशं भाविनं शाश्वतिकं वियोगमसहमान इवास्ताचलचूडाचुम्बिनि भगवति पद्मिनीवल्लभे, सा च रम्यकवृत्तान्तोपलंभाय निजसुहृदो लालनरसाख्यस्य योगिवर्यस्य निकटं दूतीमेकां प्रेषयामास । यदैव रम्यकस्तीव्रेणासिना **तीव्रबलस्य** मूर्धानमच्छिनत् तदैव निजवधरूपं राजदण्डमाशंकमानस्तस्मात् स्थानाज्झडित्यपक्रम्य गूढं निजसुहृदो यतिवर्यस्य वसतिमुपगम्य तं शरणमियाय । तस्माच्च पुरान्निष्कासनरूपं निजदण्डं विज्ञाय, अशनिहत इव निश्चेतनो धरायां निपपात । तदनु यतिवरकृतशैत्योपचारप्रत्यानीतचेतनः पुनरेवं विलपितुमारेभे ।

"धिङ्मा मन्दभागधेयं य एवं दुष्टदैवस्याक्रीडनकं संजातः। इदं मे विवासनं मरणादप्यतिदारुणं खलु। यतो मत्प्रियदयिताचरणनलिनरजःकणपावितमेतन्नगरमेव मे स्वर्गसमं; अन्यदशेषं भुवनतलमन्धतमसाक्रान्तं निरयनिकुरुंबमेव।" इति विलपन्तं, दुस्सहशोकभरपीडितं, स्वप्राणांस्त्यक्तुमुद्यतं च तं सान्त्वयन् **लालनरस** इदमभिदधे। "अयि वत्स **रम्यक**, विदितनिखिलनीतितत्वोऽपि त्वं किमेवं मन्दधिषणः प्राकृत इव प्रलपसि? अपि न जानासि यन्मरणदण्डे आदेष्टव्ये, त्वयि दयार्द्रचेतसा राज्ञा अनतितीक्ष्णोऽयं विवासनरूपो दण्डो विहितस्तव भाग्यवशादिति? यद्यपीदानीं तव जलजाक्षीवियोगस्संभवति, तथापि न स सुचिरकालवर्ती भविष्यति। अवसरे प्राप्ते, मया च युवयोः परिणयवृत्तान्तं युष्मत्पितृनिकटे प्रख्याप्य, कपिलमतङ्गकुलयोरनादिकालादुद्भूतमन्योन्यवैरं शमयित्वा, तयोः परस्परप्रीतिरुत्पाद्येत; तेन च सन्तुष्टो राजापि यथापुरं त्वामत्रैव **वीररणायां** वस्तुमनुमंस्यते। ततश्च त्वं जलजाक्ष्या समं विविधान् भोगान् भुंजानः समेतबन्धुसुहृद्वर्गश्चिरं सुखेन कालं नेष्यसि। तदधुना शृणु मे हितमेतद्वचनम्। अस्यामेव रजन्यामविदितं निजदयितानिकटं गत्वा विविधैर्वचनजातैस्त्वद्वियोगासहिष्णुन्तामाश्वास्यापृच्छ्य च, प्रजविनं वाजिनमारुह्य इतः पञ्चयोजनदूरं **मानतत्वं** नाम मनोहरं नगरमासाद्य कंचित्कालं सुखं तत्र निवसेः। अहमपि वारंवारमत्रत्यान् वृत्तान्तान् सन्देशपत्रिकामुखेन दूतमुखेन वा गूढमावेदयिष्यामि।"

इति यावत्स वदति स्म तावद्रम्यकवृत्तान्तोपलब्धये जलजाक्ष्या निगूढं प्रहिता दूती काचित् तामेव लालनरसवसतिमुपजगाम । अथ दूतीमुखादवगततदागमनप्रयोजनः स किञ्चिदिवाश्वस्तहृदयः, "यातैकयामायामद्य यामिन्यामवश्यं मत्प्रियदयितां द्रक्ष्यामि," इति तां दूतीं विसृज्य तत्रैव भिक्षुमन्दिरे दिवसशेषमनैषीत् ।

अथागतायां च त्रियामायां, गलिते चादिमे यामे, रम्यको रम्यकाननावलीमार्गेण निगूढं निजदयितामन्दिरमासाद्य सोत्कण्ठप्रतीक्षितनिजागमनामपेतहर्षामतिम्लानमुखीमेकाकिनीं ददर्श स्वां दयिताम् । तत्क्षण एव तौ दंपती गाढालिङ्गितपरस्परगात्रौ मूर्च्छानिमीलितचक्षुषौ निश्चेष्टौ च चिरं तस्थतुः । पुनर्लब्धसंज्ञौ हर्षशोकभरनिरुद्धवाग्विभवौ शनैश्शनैः प्रयत्नप्रतिलब्धसगद्गदवाचौ सप्रेमभरं सँल्लपितुमुपचक्रमाते । यद्यप्यनयोरेवं सँल्लपतोरयं द्वितीयसमागमः प्रथमसमागम इवाविदितगतयामिनीयामः, इतरेतरविरहासहिष्णुश्च तथापि संप्रति तयोर्हृदयावस्था पूर्वमिव नैकान्ततो निरतिशयानन्दमन्थरा ; अपितु भाविपरस्परविश्लेषविभावनविवर्धितदुस्सहविषाददन्तुरा बभूव ।

अथ प्रभातप्रायायां च रजन्यां, निजविरहवार्तयाप्यतीव विमनायमानां प्रियां प्रियवचनैराश्वास्य, लालनरसकथितं चावेद्य

कथंकथमपि तया विसृष्टो दृष्टिगोचरं च परिहृत्य रक्षिवर्गस्य, सद्यस्समारूढवाजितल्लजो मानतत्वं नाम पत्तनवरं प्रपेदे । तत्र चानवरतानुसंहितनिजदयितासमागमावसरः कृच्छ्रेण कालं निनाय ।

इत्थं गलति च काले, रम्यकजलजाक्ष्योः रहसि प्रवृत्तं पाणिग्रहणमङ्गलं किञ्चिदप्यजानानः वृद्धकापिलः प्रतिदिवसोपचीयमाननवयौवनप्रगुणीकृतशरीरशोभां निजां तनयां समासन्नविवाहयोग्यसमयामाकलय्य तां सौशील्यगांभीर्यधैर्यस्थैर्यवीर्यादिगुणेषु रम्यकादन्यूनायातिसुन्दरमूर्तये परेशनाम्ने प्रभुवराय दातुं निश्चिकाय । अथ विदितनिजजनकनिश्चया जलजाक्षी सविनयं सविषादं च तमेवमभिदधे ।

"तात, अनतिचिरोपनतेन प्रियसहोदरस्य तीव्रबलस्य तादृशेनाकाण्डमरणेन सुदूरनिखातशोकशंकुकीलितहृदयेष्वस्मास्विषाखिलेष्वपि बन्धुवर्गेषु, सांप्रतमसांप्रतं ते मत्परिणयनविधिं मनसापि चिन्तयितुं, किमुत विततमहोत्सवं प्रवर्तयितुम् ? अपरं नाहमद्याप्यारूढा तादृशीं प्रौढां विवाहसमुचितां दशाम् । विरम तस्मादस्मादारंभात् ।"

इति वादिन्यास्तस्याः अतिकरुणमपि वचनमनाकर्ण्यापरिहार्यनिश्चयः, उपचीयमानक्रोधकृशानुः प्रियसुतामपि तां निर्भर्त्सयन्

ससंरंभमिदमगादीत् । "वत्से, मूढमते, जलजाक्षि, अतिबालिश्यान्नजानास्यनुरूपवरप्राप्तिरूपमुपस्थितं ते महाभाग्यं । का नाम वीररणानिवासिनी कन्यका सानन्दं नानुमन्येत सकलसद्गुणगणरत्नाकरं, संपत्समृद्धिनिर्धूतयक्षराजं, परेशं नाम प्रभुयुवानं पतित्वेनावाप्तुम् ? । त्वं तु कन्यकाजनसुलभयानल्पया शालीनतयेत्थं प्रजल्पसि । तदागामिनि गुरुवारे परेशोऽवश्यं तव पाणिं ग्रहीष्यति । तदा त्वया सज्जया भवितव्यं ॥" इति सनिर्बन्धमनुशिष्य, प्रेष्यवर्गांश्चाज्ञापयामास निजविभवानुरूपविवाहसमुचिततत्तत्संभारसंपादनाय ।

पूर्वमेव निजदयितविश्लेषविह्वलीकृतचित्ता जलजाक्षी, संप्रति संचिन्त्य समुपस्थितं स्वपुनरुद्वाहं, किंकर्तव्यतामूढा, सर्वापत्सन्तरणोपायसन्दर्शनचतुरं, आत्मनि सन्ततसन्दर्शितपक्षपातं तमेव सुहृद्वरं लालनरसं नाम भिक्षुवरमनधिगतान्यशरणा शरणमियाय । अथ तयावगमितार्थस्सोऽपि परिव्राट्परिबृढः क्षणमिव तूष्णीं ध्यात्वावधार्य च तत्समये प्रयोज्यमुपायं, तामित्थमभ्यधत्त । "वत्से, जलजाक्षि, जीवितसंशयावहं साहसिकैकसाध्यं कमप्युपायमन्तरा नान्या काप्यत्र प्रतिपत्तिः । स च त्वयातिबालया निसर्गकातरया न शक्यते विधातुम् । तत्किमिदानीं मया क्रियते ?" इत्युक्ते, साप्यवादीत् । "योगिवर्य, किमुच्यते जीवितसंशयावहमुपायमिति ? अहं पुनरेतदापत्समु-

त्तरणाय शवावटमपि निर्भयं सजीवा प्रविशेयम् । अपितु जीवति मे प्राणनाथे, नान्यं पुरुषमुद्वोढुमुत्सहेय ।" इत्याकर्ण्य तस्या दृढसंकल्पमल्पेतरहर्षः स च मस्करी सचमत्कारमित्थमाचचक्षे ।

" तर्हि श्रूयतामनपायोऽयमुपायः । त्वमिदानीं प्रियविरहजं विषादं बलादन्तर्निगृह्य बहिस्सुसंहृष्टहृदयेव भूत्वा, निजजनयित्रभिप्रायमनुरुद्ध्य परेशनाम्नः प्रभुकुमारस्य भार्या भवितुमुत्कण्ठितेव कृतक्षणा भव । गुरुवासरे किल भविता भवत्या विवाहमहोत्सवः । श्व एव बुधवासरे रात्रावास्वादयस्व मया संप्रति दीयमानं द्वाचत्वारिंशन्मुहूर्तपर्यन्तस्थायिमूर्च्छाप्रदं काचकूपीस्थमेतदौषधम् । तत्क्षणादेव त्वं सर्वैरप्याकारैर्गतजीवितेव निरस्तनिश्वासा, निश्चेष्टा च भविष्यसि । ततो गुरुवासरे प्रातर्यावत्सबन्धुवर्गस्त्वां कल्याणमण्डपं नेतुं समायास्यति वरस्तावन्निश्चेष्टां त्वां वीक्ष्य गतासुं मत्वा विरंस्यति कौतुकमङ्गलकौतुकात्। ततस्त्वत्पिता च त्वां मृतां मत्वा, यथादेशाचारमनावृतशरीरां त्वामासन्द्यामारोप्य निखिलपौरजनविदितं श्मशानं नीत्वा यथाकुलाचारमन्तर्भौमे निजकुलशवमन्दिरे निक्षिप्य तद्द्वारं शिलापट्टेन पिधाय मृत्संचयेन गर्तं पूरयित्वा, सहसुहृद्बन्धुवर्गः सानुचरश्च सविषादं स्वगृहं प्रतिनिवर्त्स्यति । अत्रान्तरे मयापि निगूढं दूतहस्तप्रेषितया सन्देशपत्रिकया मानतत्वनिवासी तव

जीवितेशस्तथानुशिष्येत, यथा स तस्यामेव रात्र्यां अत्रागत्य विगतौषधिवीर्यत्वात्सुप्तोत्थितामिव तत्कालप्रतिलब्धसंज्ञां त्वां शवमन्दिरादुद्धृत्य त्वया सहैव **मानतत्त्वं** यास्यति।" इत्युक्त्वा औषधपूर्णां तां काचकूपिकां तस्या हस्ते दत्तवान्।

सा च तां परिगृह्य सुगुप्तं निजनीवीबन्धनान्तर्निक्षिप्य किञ्चित्प्रक्षीणसाध्वसा भिक्षुमन्दिरान्निरगात्। गृहाभिमुखी यावदेकाकिनी प्रातिष्ठत, तावज्जनयित्रा निजपतित्वेन निर्दिष्टः **परेशो** नाम प्रभुयुवा, मध्येमार्गं सम्मुखीभूय, "ननु सुन्दरि, भवती परश्वः प्रातः प्राणेभ्योऽपि गरीयसी भार्या मे भविष्यति," इत्यादिचमत्कृतिचर्चितैश्चाटुवचनजालैस्तामुपतस्थे।

सापि तस्मिन्नितरां जातानुरागेव प्रयत्नकृतदरहासितविराजमानवदनाम्बुजा, "प्रभुकुमारक, नियतं महाननुग्रहः कृतः स्याद्यद्येष जनो भवत्करकमलग्रहणमङ्गलभाजनं भवेत्।" इति सचमत्कारमभिधाय निजभवनमयासीत्। भाविने परिणयाय कृतक्षणां स्मेराननां तामालोक्य तस्याः पिताप्यतीव हृष्टमनाः स्वविभवानुरूपानखिलान् विवाहोचितसंभारान् सज्जीकृत्य, परिणयदिवसं प्रतीक्षमाणस्तस्थौ।

ततो गते च भौमवासरे, आयाते च सौम्यवारे, रात्रौ निर्वर्तिताभ्यवहारक्रिया, सा च जलजाक्षी प्रविश्य निजशयनगृहमा-

रूढपर्यंका, नीवीबन्धनिक्षिप्तां काचकूपीं करतले कृत्वा, क्षणमेवं निजमनस्यचिन्तयत् ।

"अप्येतद्रम्यकस्य रहोनिर्वर्तितमत्पाणिग्रहणविधौ मुख्यप्रेरकतया स्वस्मिन्नारोपयिष्यमाणमपवादं निराचिकीर्षुणा **लालनरसेन** मन्मरणायोपपादितं गरलं स्यात्? अथवा कृतं सन्देहेन। अस्मदभ्युदयैकदत्तचेता अत्युदारस्वभावोऽयं वृद्धभिक्षुः कथमेतादृशं नीचजनयोग्यमतिनिकृष्टं कर्म समारभेत ? तन्नूनमिदं मदापदुद्धारकमत्यद्भुतशक्तिसंपन्नं किमपि महौषधमेव । अपितु, यद्येतत्पानेन संजातमूर्च्छाहं शवावटे निक्षिप्ता, मत्प्रियागमनात्पूर्वमेव लब्धसंज्ञा भवेयं, तर्ह्यनेकनरास्थिसंचयसंकुलमितस्ततो नरीनृत्यमानविविधभूतप्रेतपिशाचादिगणभीषणं प्रेतस्थानमालोक्य भीतभीता भवेयं । तत्किमधुना पिबेयमेतदौषधं न वा ?" इति क्षणं सन्देहदिग्धहृदया बभूव । ततश्च तस्याः रम्यकगता अन्यादृशी प्रीतिः परेशपाणिग्रहणेन भाविपातिव्रत्यभंगभीरुता च तां तदौषधभक्षणे दृढमनस्कां चक्रतुः । पीतमात्रे च तस्मिन्नौषधविशेषे, मरणसमया मूर्च्छयागृह्यत सा तपस्विनी ।

ततः प्रत्यूषे च गुरुवासरे धृतविविधविचित्रविशेषवस्त्रमाल्याभरणोऽष्टादशवाद्यघोषबधरीकृतनिखिलहरिदन्तरः सकलबन्धुजनानुयातः **परेशो** नाम वरो यावत् सानन्दं वधूं कल्याणमण्डपमानेतुमुपासर्पत् ; तावद्दीर्घनिद्रां गतां तामालोक्य विह्वलचित्तः परित्यक्तसकलाडंबरः सव्रीडमधोमुखो निजनिलयमयासीत् ।

वृद्धकापिलश्च, स्वसुतायास्तादृशमतर्कितोपनतं निधनमालोक्य नितरां विषण्णहृदयस्तत्क्षणं तां शवयानमारोप्य निरर्गलगलद्बाष्पानिरुद्धनिजगलः सकलबन्धुवर्गसमेतः प्रेतभूमिं गत्वा यथाकुलाचारं तां शवावटे निक्षिप्यापस्नातः सविषादं स्वभवनमयासीत् ।

अत्रान्तरे **लालनरसो**ऽपि जलजाक्ष्याः सर्वं कृतकमरणव्यतिकरं विस्तरतो विलिख्य, "वत्स रम्यक, त्वयावश्यमस्यां, रजन्यामेवात्र सत्वरमागत्य तत्कालप्रत्यागतचेतना निजहृदयवल्लभा शवमन्दिरादुद्धृत्य मानतत्वनगरं प्रति नेतव्या," इति सम्यगनुशिष्य, तत्पत्रमत्याप्ततमस्य कस्यचिल्लेखहारकस्य हस्तेन मानतत्वनगरवर्तिने रम्यकाय सुगुप्तं प्रेषयामास ।

तस्मिंश्च रयापहसितहरिहयहयं हयवरमारुह्य गच्छति रम्यकदैवदुर्विपाकात् स च वाजितल्लजोऽतिवेगेन धावन् मध्येसरणि स्खलितचरणो भूमौ निपत्य ममार । तदनु संदेशहार्यपि वाहविहीनः पद्भ्यामेव चलन्नस्तमनसमये मानतत्वपुरमाससाद । अपितु तत्र सर्वत्रान्विष्यन्नपि रम्यकं न ददर्श । दूतागमनात्पूर्वमेव जलजाक्षीनिधनोदन्तो रम्यकस्य कर्णपथमवातरत् । यतोऽतिक्षेपीयसी खलु गतिरशुभवार्तायाः शुभवार्ताया अप्यत्र भुवने ।

गतायां रात्रावेव रम्यकः प्रियाविरहासहिष्णुमात्मानमुपरतं पश्चात् अचिन्तितोपनततदाश्लेषमवाप्य प्रत्युज्जीवितं सार्वभौमपदवीमारोपितं च स्वप्ने दृष्ट्वा स्वाभ्युदयाशंकी किञ्चिदाश्वस्तहृदय इव तस्थौ। किन्त्वस्मिन्दिवसे मध्याह्न एव कर्णाकर्णिकयाकर्ण्य निजदयितानिधनं द्विरनुभूतमरण इव विकलकरणः क्षणं स्थित्वा, ततः कथञ्चिदालंब्य धीरतां अयं वीरयुवा, तत्पुरे राज्ञा सर्वदा सर्वथा प्रतिषिद्धेऽपि विषविक्रये, कस्माच्चिदतिधनायापिशाचिकाग्रस्तचेतसोऽतिकृपणादापणिकादनल्पेन मूल्येनावाप्य तादृशमतितीव्रतरं गरलं पीतमात्रेण येन विंशतिपुरुषबलोऽपि नरस्तत्क्षणादेवान्तकपुरातिथीक्रियते, तच्च निजकञ्चुकान्तर्निगूढं विधायारुह्य चातिजवनं वनायुजं वाजिरत्नं, सरलेन सरण्यन्तरेणार्धरात्रवेलायामविदितमाजगाम कापिलकुलपरेतमन्दिरं, यत्र शायिता वर्तते सा निजदयिता।

यावत् स दीपं प्रज्वाल्याविदूरस्थं खनित्रमादाय प्रेतगृहोपरिक्षिप्तमृत्स्नोत्सारणाय खनति स्म, तावत् स्वभार्यात्वेन निर्दिष्टां दिष्टदोषादकस्मात् तादृशीं दशामापन्नां प्रेयसीं विश्रब्धमनुशोचितुं तस्याः शवसदनं कुसुमैरलंकर्तुं च तत्र तस्यां वेलायामागतोऽनुचरद्वितीयः परेशो नाम प्रभुयुवा, रम्यकेण निर्वृत्तचरं जलजाक्षीपरिणयविधिमजानानः, परेतायास्तस्याः कदर्थनायैव तदागमनं मन्यमानो मन्युपरीतमानसः सुधीरं तमिदमाह। "रे मातङ्गकुलपांसन, किमेवं दूषयसि मद्दयिताशवस्थानं अपवित्रेण

तवानेन चरणपातेन ? अपि विस्मृतवानसि यत्तीव्रबलघातकस्य तवात्र वीररणानगरे क्षणमात्रमप्यवस्थानं मरणायेति ? तज्झडिति मुच्यतामिदं स्थानं, पलाय्यतां चान्यत्र यदि जीवितेन ते प्रयोजनं । नो चेत् त्वां जीवग्राहं गृहीत्वा राजपुरुषैः शूलमारोपयिष्यामि ।"

इत्याकर्ण्य कर्णपरुषं तद्भाषितं जातात्यन्तामर्षः रम्यकः, "अपेह्यरे दुष्टक्षत्रियाधम, किमेवमकारणं तीव्रबलेन गतां गतिमनुसर्तुमभिलषसि ?" इति सधाष्टर्यं तद्वचनमाकर्ण्य यावत्परेशस्तं जिघांसुरसिं कोशादाकर्षति स्म ; तावद्रम्यको निजनिस्त्रिंशेन चिच्छेद तस्य मूर्धानम् ।

ततो रम्यकः, "क एष मया हतो महावीरः ?" इति निपुणं निरूपयन् कापिलमहत्तरेण जलजाक्ष्याः पतित्वेन निर्दिष्टं, दिष्टवशात् तस्यां मृतायां, तदनुशुशोचिषया तत्रागतं परेशं परिज्ञाय, जातानुशयस्तच्छरीरमपि तस्याश्शवावटे निक्षेप्तुकामो यावत्प्रेतावटकवाटमुदघाटयत् ; तावत्तदाप्यनपगतौषधवीर्यत्वात्सुखसुप्तामिव तीव्रबलप्रेतानिकटे शयितां प्रेयसीमालोक्य, असह्यशोकानलज्वालाकवलितगात्रः क्षणान्तरे प्रत्युज्जीविष्यन्तीमपरिजानंस्तामविरलितकपोलमाश्लिष्य क्षणमिव मूर्च्छानिमीलितनयनयुगलः स्थित्वानन्तरं निजकञ्चुकान्तास्स्थितं, अतितीव्रं गरलमशेषमास्वाद्य तया सह शिश्ये ; क्षणाच्च गतासुर्बभूव ।

अत्रान्तरे रम्यकायाप्रापितलेखं स्वनिकटं प्रत्यावृत्तं सन्देशहरमालोक्य, **लालनरसः**, प्रागेव तत्रागत्य तादृशीं दशामापन्नं रम्यकमविदित्वा, जलजाक्षीमूर्च्छापगमाय निर्दिष्टकालस्यात्यासन्नतया, तस्मिन्निशीथे सखनित्रदीपहस्तः एकाकी रुद्रभूमिमध्यस्थं यावत्कापिलशवमन्दिरमासादयति स्म ; तावत्तत्र धूलिभूसराङ्गौ परासू परेशरम्यकौ, तत्पार्श्वपतिते पन्नगपरिबृढभोगभीषणे महासिलते च प्रेक्षांचक्रे। अनयैव कालकलया जलजाक्ष्यपि, अपगतमूर्च्छाविकारा, सुप्तोत्थितेव प्रतिपन्नप्रतिबोधा, अग्रतस्स्थितं मस्कारिणं च परिज्ञाय, "स्वामिन्, क्व मे प्राणसखः स रम्यकः ?" इति ससंभ्रमं सानुरागं चानुयुयुजे।

सोऽपि तां प्रतिवक्तुं यावत्प्रववृते, तावदभ्यर्णमागच्छतो जनसमूहस्य महान्तं कोलाहलध्वनिं निशम्य, इदमित्थमित्यभ्यूहितुमप्यनवसरतया भयतरलितमानसः, "एह्येहि वत्से, अस्मात् स्थानात् सत्वरं पलायावहे ; अत्राभ्येति महान् जनसन्दोहः" इति वदन्नेव द्रुतगतिः स्वाश्रयं प्रत्यधावीत्।

जलजाक्षी तु रम्यकाभिनिविष्टचेताः स्वसमीपतः परेतावस्थां प्राप्तं हस्तधृतविषकूपीकं तमालोक्य, आत्मनः कृते गरलं पीत्वा मृत इति निश्चित्य स्वयमपि तमनुजिगमिषुस्तत्कराद्विषपात्रीमाकृष्य तत्र च गरलावशेषमपश्यन्ती, विषार्द्रं तस्याधरं पीत्वापि मर्तुकामा चुचुम्ब तस्य रदनच्छदपुटं। तथाप्यसुभिर-

मुक्तमात्मानं निध्यायावधार्य चाभ्यर्णमुपसर्पतो महतो जनसमूहस्य पदशब्दं, सत्वरमात्महननक्षमं साधनान्तरमलभमाना, तत्रेतस्ततो दृष्टिमक्षिपत्। ततश्च दैववशात् तत्र भूमौ पतितां महासिलतामादाय स्वहृदयाभ्यन्तरे बलात् प्रावेशयत्, क्षणाच्च गतचेतना रम्यकसमीप एव शिश्ये।

पूर्वं परेशरम्यकयोः प्रवृत्तेऽतिघोरे शस्त्राशास्त्रिकलहे प्रत्यक्षसाक्षीभूतेन केनचित् परेशस्य पार्श्ववर्तिना सर्वेऽपि नगररक्षिण उच्चैराक्रुश्याहूताः। ततस्तेषां कोलाहलं श्रुत्वा कापिलमातङ्गादयस्सर्वेऽपि पुरवासिनस्समहीपालास्समाकुलचेतसस्तत्र समं समाययुः। तदानीमेव स्वाश्रयं प्रति चटुलगत्या पलायमानं तरललोचनं लालनरसं समालक्ष्य रक्षापुरुषेषु केचन शंकितचेतसस्तमयोवलयसंयतपाणिमवनिपतेस्सविधमानिन्युः। सोऽपि राज्ञा सनिर्बन्धं पृष्टः सभयं सविषादं सगद्गदं च जलजाक्ष्याः कृतकमरणादिकं सर्वमुदन्तं विस्तरतो व्याचचक्षे। लालनरसेनाप्यविदितो रम्यकस्यात्महत्याविषयको वृत्तान्तश्च रम्यकेणैव स्वपित्रर्थं लिखितेन लालनरसवृत्तान्तसंवादिना, रम्यककञ्चुकान्तर्निक्षिप्तेन लेखेनैव सम्यगवगतोऽभूत्।

तदनु नरपतिः कपिलमतङ्गकुलसंधित्सया कृतविविधप्रयत्नं तदर्थमनुभूतानेकविधक्लेशं लालनरसं निरपराधं विदित्वा तं प्रशंसापूर्वं विमुच्य, कापिलमतङ्गमहत्तरावाहूय नितरां निर्भर्त्स्य च ससंरंभमिदमभ्यधात्।

" भोः कपिलमतङ्गकुलमहत्तरौ, पश्यतमद्यात्यन्ताविवेकाद-नादिकालादारब्धस्य कारणवर्जितस्य वां वैरस्य परिणातम् । सोऽयं महान् दण्डो युष्मदकारणकलहमनिच्छता कुलद्वयसमाधानमाधित्सुना सर्वात्मनैव भगवतैवं युवयोरुपरि पातितः। यतः सत्यपि परस्परं महति वैरे, तदविगणय्य तावतौ जलजाक्षीरम्यकौ परस्परानुरागाकृष्टचेतसौ रहोनिर्वर्तितपाणिग्रहणमंगलावपि, युवयोर्वैरस्यातिक्रौर्यादिदानीं विसृज्येमं गर्हणीयं मर्त्यलोकं, अमर्त्यदंपती बभूवतुः । तद्यदीतः परं पूर्ववद्बद्धवैरौ भवेतं, तर्हि वां ससुहृद्बन्धुवर्गौ नगरान्निष्कासयिष्यामि " इति ।

ततस्तावपि तदभिनन्द्यातिहितमवनिपतिभाषितं तदारभ्य वीतवैरौ परस्परमत्यन्तसौहृदपूर्णहृदयौ चाभूताम् । ततो द्वावपि तौ मतङ्गकपिलकुलधौरेयौ लोकान्तरं गतयोरपि स्नुषाजामातृपदभाजनतां प्राप्तयोस्तयोः शवावटोपरि परस्परप्रेमाधिक्यसूचकमनर्घमतिमहदभ्रंलिहं च स्तंभद्वयं प्रतिष्ठाप्य, तत्र चाचन्द्रार्कस्थायिन्यौ जाम्बूनदमय्यौ विविधविशेषमुक्तारत्नालंकारालंकृते जलजाक्षीरम्यकयोः प्रतिकृती च निर्मापयामासतुः ॥

ERRATA IN ROMEO AND JULIET.

Page	Line	For	Read
3	2	तद्विस्हानल	तद्विरहानल
4	14	प्रभु वर	प्रभुवर
,,	20	सावनयं	सविनयं
5	9	विजृम्भणावलसित	विजृम्भणविलसित
7	11	पितृव्य वचन	पितृव्यवचन
10	10	चन्द्रकान्तः	चन्द्रकान्तः ॥
,,	11	हर्षभर	हर्षभर
12	16	मङ्गल	मङ्गलं
14	16	त्वत्रृत्तान्तां	तवृत्तान्तां
18	14	नैतदति	नैतदति·
20	1	धिङ्मा	धिङ्मां
,,	13	परस्परप्रीति	परस्परप्रीति-
,,	16	नेप्यासि	नेष्यसि
,,	22	आवेदाय्प्यामि	आवेदयिष्यामि
23	7	भ तव्यं	भवितव्यं
25	19	र्तिताभ्यव	र्तिताभ्यव
27	3	गलद्बाप्प	गलद्बाष्प
,,	7	मस्यां,	मस्यां
28	9	पुरुष	पुरुष-
29	1	तवानन	तवानेन
30	16	भिनिविष्ट	भिनिविष्ट
32	2	परिणातम्	परिणतिम्

चेन्नपुर्यां 'ओरियन्ठल्' मुद्राक्षरशालायां मुद्रितम्.